नित्यक्रियापद्धति

प्रथमभाग

वन्देऽहं श्रीगुरोः श्रीयुतपदकमलं श्रीगुरून् वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम्।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यदेवं
श्रीराधाकृष्णपादान् सहगणललितान् श्रीविशाखान्वितांश्च॥

❁ स्वप्नविलासः ❁

प्रिय स्वप्ने दृष्टा सरिदिनसुतेवात्र पुलिनं
यथा वृन्दारण्ये नटनपटवस्तत्र वहवः।
मृदंगाद्यं वाद्यं विविधमिह कश्चिद्द्विजमणिः
सविद्युद्गौरांगो क्षिपति जगतीं प्रेमजलधौ॥१॥

(१)—नदी कालिन्दी सी तट सपन में देखत रही।
तहां बृन्दारण्य निरत चतुराई बहुत ही।
मृदंगादी बाजें, कोउ तडित-गोरे द्विजमणी,-
डुबाये हैं देते जगत निज प्रेमाब्धि सरणी॥

कदाचित्कृष्णेति प्रलपति रुदन्कर्हिचिदसौ
क्व राधे हा हेति स्वसिति पतति प्रोज्झति धृतिं।
नटत्युल्लासेन क्वचिदपि गणैःस्वैर्प्रणयिभि
स्तृणादिब्रह्मान्तं जगदतितरां रोदयति सः॥२॥

(२—कबौं हा, कृष्णेति विलपत करैं रोदन महा,
कहाँ राधे? हा! हा! कह गिरत छांड़े धृति रहा।
कबौं नाचैं प्रेमी परिजन लिये रंग रस में,
तृणादि ब्रह्मालौं जगतहिं रुवावैं विरह मे॥

ततो बुद्धिर्भ्रान्ता मम समजनि प्रेदय किमहो
भवेत्सोऽयं कान्तः किमयमहमेवास्मि न परः।
अहं चेत् क प्रेयान्मम स किल चेत् कहमिति मे
भ्रमो भूयो भूयानभवदथ निद्रां गतवतां ॥३॥

(३)—भयो मेरी बुद्धि भ्रम निरख ये कौतुक कहा,
अहो, ये हैं प्यारे, स्वयमहिं किधौं हौं पर-कहां?
यदी हौं तो, प्रेमी हरि कहां- वे यदि अहीं,
कहां हौं मैं ऐसें भ्रमनि परि पुनि निद्रित रही॥

प्रिये दृष्ट्वा तास्ताः कुतुकिनि मया दर्शितचरी
रमेशाद्या मूर्त्तिर्न खलु भवती विस्मयमगात्।
कथं विप्रो विस्मापयतुमशकत्त्वां तव कथं
तथा भ्रान्तिर्धत्ते सहि भवति को हन्त किमिदम् ॥

(४)—हरी बोले प्यारी कुतुकिनि लखीं आपु कितनी
रमेशादी मूर्ती मम, नहिं भई विस्मित घनी।
किधौं ऐसे विप्रै निरखि मन विस्मै सकत है,
तथा भ्रान्ती आई वह यह नहीं को यह अहै? ॥

इति प्रोच्य प्रेष्ठां क्षणमथ परामृश्य रमणो
रसज्ञाकूतज्ञं व्यनुददय तं कौस्तुभमणिं।

तथा दीप्तीं तेने सपदि स यथा दृष्टमिति तद्
विलासानां लक्ष्म स्थिरचरगणैः सर्वमभवत् ॥५॥

(५)—तवै अन्तर्यामी हरि कछु हँसे सोच करनी,
कहै यों प्यारे नै समुदित करी कौस्तुभ मनी।
भयी ऐसी कान्ती सपन मँह लीला जस घटी,
विलासौं की सोभा थिरचर विसै पूर्ण प्रघटी॥

विभाव्याथ प्रोचे प्रियतम मया ज्ञातमखिलं
तवाकूतं यच्चं स्मितमतनुथास्तत्वमसि माम्।
स्फुट यज्ञावादी यदभिमतिरत्राप्यहमिति
स्फुरन्ती मे तस्मादहमपि स एवेत्यनुमिमे ॥६॥

(६)—तवै राधा बोलीं मन गुनि हरे प्रीतम अहो,
अवै जानी-मंद स्मित कियौ "गौर" तुमहो।
करी ना जो वार्ता प्रगट मम आभास लखिकैं,
लसै मेरी कान्ती अब सहज लीन्ही निरखिकैं॥

यदप्यस्माकीनं रतिपदमिदं कौस्तुभमणिं
प्रदीप्यात्रैवादीदृशदखिलजीवानपि भवान्।
स्वशक्त्याविर्भूय स्वमखिलविलासं प्रतिजनं
निगद्य प्रेमाब्धौ पुनरपि तदा धास्यसि जगत् ॥७॥

(७)—हमारी जो प्यारी रति पद अहै कौस्तुभ मनी,
अनौखी दीसी में निपट प्रगटे जीव धरनी।
स्वयं शक्ती धारी अवतरि रसोत्कंठि जन में,
अनौखे, प्रेमाब्धी लहर लहरावौ भुवन में॥

श्रुतिविदा

यदुक्तं गर्गेण व्रजपतिसमक्षं

भवेत्पीतो वर्णः क्वचिदपि तवैतन्नहि मृषा ।

अतः स्वप्नः सत्यो मम च न तदा भ्रान्तिरभव

त्त्वमेवासौ साक्षादिह यदनुभूतोऽसि तदतम् ॥८॥

(८)--कही जो है वानी गरग मुनि ने गोप पति सों,
''कवौं ये ही पीरे बरन प्रगटैं शान्त मति सौं''
अतः साँचौ स्वप्नौ मम मन भयौ है भ्रम नहीं
तुम्हीं हौ ये साक्षात् सकल अनुभूती मम सही ॥

पिवेद्यस्य स्वप्नामृतमिदमहो चित्तमधुपः

स सन्देहस्वप्नात्त्वरितमिह जागर्ति सुमतिः

अवाप्तश्चैतन्यं प्रणयजलधौ खेलति यतो

भृशं धत्ते तस्मिन्नतुलकरुणां कुञ्जनृपतौ ॥९॥

(९)--पियै कोई प्रेमी मन मधुप प्रेमामृत यहै.
मनों से संदेह स्वपन तजि जगै मति लहै ।
वहै श्री चैतन्य-प्रणय जलधी की लहर में,
कृपा पावै कुंजेश्वर-विमल राधाधु वर में ॥

इति श्रीविश्वनाथ चक्रवर्त्ती विरचित

स्वप्नविलासः समाप्तः

अनुवादक हरिकृष्ण कमलेश

श्रीराधामाधवो जयति ।

श्रीकृष्णचैतन्यचन्द्राय नमोनमः ।

श्रीकृष्णचैतन्यमहाप्रभु की
बारहखड़ी महिमा

कका-कलियुग आयो जान के नवद्वीप निजधाम ।
प्रगटे धरि गौरांग वपु सुन्दर श्री घनश्याम ॥ १ ॥
खखा-खान पान और विषयप्रिय देख सकल संसार ।
करुणासिंधु महाप्रभू कीनौ भक्ति प्रचार ॥ २
गगा-गौड़ देश पावन कियौ धरि गौरांग स्वरूप ।
उद्धारे हरि ने पतित परे हते भव कूप ॥ ३ ॥
घघा-घर २ कीर्तन कृष्ण को करि २ पावन कीन ।
बाल वृद्ध वनिता सबहि करे प्रेम रस लीन । ४ ॥
नना-नाहक जन्म उमाउ मति करि लै हरिसों नेह ।
बार बार नहिं बावरे पावैगो नर देह ॥ ५ ॥
चचा-चरण भजौ चैतन्य के जो सुख चाहौ चित्त ।
रसिकन के जीवन वुही प्राण बरोबर वित्त ॥ ६ ॥
छछा-छाँड़ि सकल दुर्वासना भजि लीजै चैतन्य ।
ज्ञान योग सब भोग तजि कीजै भक्ति अनन्य ॥ ७ ॥
जजा-जो हरि बृन्दा विपिन में नाचे गोपिन सङ्ग ।
सोई अब सन्यास धरि सिखवत हैं सत्सङ्ग ॥ ८ ॥
झझा-झाँझ मृदङ्ग बजावहीं भक्त यूथ चहुँ ओर ।
'हरे कृष्ण गोविंद' कहि निर्तत गौर किशोर ॥ ९ ॥
ञञा-नित नवीन यह माधुरी मगन रहो मन मोर ।
पड़त रहे इन कान में गौर नाम कौ शोर ॥१०॥

टटा-टूक टूक की गूदड़ी गौर चरण अनुराग।
बड़े भाग्य तें पाइयें बिषयन सों बैराग ॥११॥
ठठा-ठाकुर नाहिन दूसरौ श्री चैतन्य समान।
जो निज भक्तन देत हैं प्रेम भक्ति को दान ॥१२॥
डडा-डारि भार संसार को धरि सन्यासी भेष।
उद्धारौ हरिनाम तैं सब बङ्गालो देश ॥१३॥
ढढा-ढाइ दिये नाना कुमति करि हरिनाम प्रहार।
नवद्वीप निज धाम में कीनो नित्य बिहार ॥१४॥
नना-निंदक पापी पतित अति दुष्टन के सिरमौर।
ते गौरांग प्रताप ते भये और से और ॥१५॥
तता-तारे पतित अनेक प्रभु को करि सके बखान।
कठिन कुलिश पाषान सों भये प्रेम रस खान ॥१६॥
थथा-थोरे कौं मानत बहुत माथे लेत चढ़ाय।
ऐसे हरि कों बाबरे क्यों न भजे चितलाइ ॥१७॥
ददा-दास होहु चैतन्य के लेउ गौर यह नाम।
तो निश्चय कर पाइये अन्त समय निज धाम ॥१८॥
धधा-धीरज धर मन बाबरे काहे कूं अकुलाय।
मोसे कितने पतित प्रभु दीने पार लगाय ॥१९॥
नना-नास किये नाना कुमति प्रगट करी रस रीत।
एसे हरि की बावरे क्यों न करै परतीत ॥२०॥
पपा-प्रगट न होते जो कहूं गौर चन्द्र भगवान।
तो कलियुग के जनन कौं क्यों होतो कल्याण ॥२१॥
फफा-फार्यो जिन हरिणाकशिपु रावण डार्यो मार।
कंस पछार्यो छिनक में सोई शची कुमार ॥२२॥
बबा-बढ्यो चहुँदिश प्रेम प्रभु किये अनाथ सनाथ।
जबते प्रघटे गौर हरि भक्त बृन्द ले साथ ॥२३॥

भभा-भाल तिलक माला गले नैन प्रेम जलपूर।
करुणासिंधु महा प्रभू मेरी जीवन मूर ॥२४॥
ममा-मारि मारि जेले असुर कृष्ण किये उद्धार।
भक्ति दान दे गौर हरि ते सब कीये पार ॥२५॥
यया-जन्म लियौ नदिया नगर जगन्नाथ द्विज गेह।
भक्तन ते गौरांग प्रभु कीनौ अधिक सनेह ॥२६॥
ररा-रूप सनातन आदि लै हरि के भक्त अनंत।
जिन वृन्दावन माधुरी प्रगट करी रसवन्त ॥२७॥
लला-लाजत जाकौ बदन लखि कोटि शरद के चंद।
करुणासिन्धु महा प्रभो काटो सब दुख द्वन्द ॥२८॥
ववा-वह बांकी चितवन बसी झाँकी परम रसाल।
राह चलत हूँ जिन करी ते हू भये निहाल ॥२९॥
शशा-शची तनय बिन कौन जग ऐसौ परम दयाल।
शरण लेत ही देत हैं प्रेम भक्ति ततकाल ॥३०॥
षषा-षड् भुज धरि दर्शन दियो जगन्नाथ में नाथ।
धनुषबाण वंशी लई दण्ड कमण्डलु हाथ ॥३१॥
ससा-साधुन की लै मंडली करि कीर्तन तिंह बीच।
उद्धारौ हरि ने पतित काजी सौ अति नीच ॥३२॥
हहा-हरी हरी हरि को यही घरी घरी नित खेल।
हरी करी पाषण्ड ते जरी भक्ति की बैल ॥३३॥
प्रेम भरी हरिने करी कृपादृष्टि की कोर।
हरी खरी बारा खड़ी 'रस निधि' "नंदकिशोर" ३४॥
लीला यह चैतन्य की गावैगो जो कोइ।
रूप प्रेम रस माधुरी हृदय प्रकाशित होइ ॥३५॥
इति श्री जयदेव वंशावतंस श्रीनन्दकिशोर चन्द्र गोस्वामि
प्रभुकृत बारहखड़ी समाप्तम्।

❀ श्रीकृष्ण अष्टोत्तरशत नाम माला ❀

—:❀०❀०❀:—

जय गोविन्द गोपाल जय जयति गदा धर नाथ।
कृष्णचन्द्र की जै कृपा करुणामय गुण-गाथ॥
जय गोविन्द गोपाल जय वनमाली व्रजचन्द।
श्री राधा के प्राण धन देव मुरारि मुकुन्द॥
गोविंद गुण गाये नहीं किये न हरि के काम।
दिन दिन मानस को जनम वीत गयो वेकाम॥
मिथ्या काजन में दिवस रैन बिताई सोय।
भजे न राधा कृष्ण पद पछि तापे कहा होय॥
कृष्ण भजन हित जीव तू आयौ या संसार।
जनम बितायौ वृक्ष सम मिथ्या माया धार॥
फल रूपो कन्या सुवन डारन सों टपकाय।
काल रूप जग में बसै पंछी सम दरसाय॥
कृष्णचन्द्र लीयो जनम मात देवकी गोद।
सुमन वृष्टि देवन करी मथुरा छयो प्रमोद॥
राखि चले वसुदेव जी नन्दराय के गेह।
गोकुल में श्री लालजू बाढ़े सहित सनेह॥
राख्यौ बाबा नन्द ने नन्द—नन्दन वर नाम।
जसुदा राख्यौ मुदित मन जदु-वाञ्छा-धन नाम॥
नाम धरयौ उपनन्दजू सुन्दर श्री गोपाल।
धरयौ नाम व्रज बालकन ठाकुर व्रज गोपाल॥
सुबल सखा राख्यौ हरषि ठाकुर कान्हां नाम।
श्री दामा राख्यौ सुखद गोपन राजा नाम॥
व्रज गोपीगण मिल धरयौ नवनी चोरा नाम।
धरयौ विनोदिनि राधिका कालो-सोहना नाम॥

कुब्जा अलबेली धरयो पतित पावन हरि नाम।
वंशीधर-मोहन धरयौ चन्द्रावलि अभिराम॥
अन्त न पायो शेष तव नाम अनन्त बखान।
कृष्ण नाम मुनि गर्ग जू धरयो ध्यान में जान॥
वनकी हिरनीगन धरयौ वनमाली सुललाम।
राख्यौ श्री गजराजने श्री मधुसूदन नाम॥
भक्त अजामिल ने धरयौ नारायण सुख धाम।
देव चक्र पाणी धरयौ मुनि अगस्त ने नाम॥
धरयौ पुरन्दर ने सुभग श्री गोविन्द विचार।
दीन बन्धु यह द्रौपदी लियौ हिये में धार॥
विप्र सुदामा ने धरयौ दारिद-भंजन नाम।
व्रज वासिन राख्यौ हरषि व्रज-जीवन, सुख धाम॥
दर्प-दलन अर्जुन सखा धरयौ हरी को नाम।
गरुड़ देव राख्यौ मुदित पशुपति पूरण काम॥
नाम युधिष्ठिर नै धरयौ यदुवर देव ललाम।
दीनन को ठाकुर कह्यौ भक्त विदुर सुखधाम॥
बासुकि राख्यौ हरषि हिय नाम क्षिति-स्थिति देव।
ध्रुव बालक ध्रुव-सारथी नाम धरयो लखिभेव॥
भक्त-प्राण-धन कहि लियौ नारद मुनि हिय धार।
लक्ष्मी नारायण कह्यौ भीष्म देव निरधार॥
देवी सतभामा धरयौ सत्य-सारथी नाम।
जाम्बवती योधापती राख्यौ नाम ललाम॥
विश्वामित्र मुनि नै कह्यौ जग जीवन सुविचार।
गौतम—ऋषि पत्नी धरयौ नाम पाषाण-उधार॥
जग—हितकारी यह धरयौ भृगु मुनि सांचौ नाम।
पंच मुखन गायौ मुदित त्रिपुरारी श्रीराम॥

दानी बलि-राजा धरयौ कुञ्ज-केलि सुख सार।
धरयौ नाम प्रह्लादजी श्री नरसिंह मुरारि॥
दैत्य-दलन दारिद-हरन देव द्वारका वीर।
द्रुपद सुता की लाज हित कियौ चीर प्राचीर॥
चिन्मय सत्य स्वरूप सो राजत श्री गोलोक।
रमा-रमण वैकुण्ठ पति श्री वैकुंठ विशोक॥
वासुदेव, प्रद्युम्न, बल चतुर्व्यूह अनिरुद्ध॥
पुण्य-प्रभा पूरण-पुरुष प्रघटे रूप विशुद्ध॥
बामन वपु धरि बलि छल्यौ थंभ नरहरी रूप।
मत्स्य कूर्म बाराह वपु धारे अमित अनूप।
क्षीरोदक शायी हरी अरु गर्भोद विहारि।
कारण सागर शक्तिमय मायामय संसारि॥
गोपवेष धरि हरि करत लीला ललित ललाम।
कुंज-मंजु जमुना पुलिन श्री बृन्दावन धाम॥
यह लीला कह लाल को शेष न पायौ अन्त।
धाम धाम धायौ सुजस छायौ दिव्य दिगन्त॥
बाल विनाशिनि पूतना दयी मातु गति लाल।
ऐसौ देव न दूसरौ देख्यौ दीन—दयाल॥
तीन बरस के बाल वपु दीन शकट उलराय।
तृणावर्त केशी बका धेनुक अघ विनसाय॥
ब्रह्मा मन मोहन कियो हरे बच्छ गोपाल।
गिरि गोवर्धन धार किय यमलार्जुन उद्धार॥
कालिय बिष धर की विषम फैलत फन फुंकार।
ताण्डव पण्डित करत तहँ निर्भय-निरत अपार॥
यमुना कूल कदम्ब बन मधुर मुरलिया गाय।
चोरत गोपीगन वसन रास रसिक हरिराय॥

दर्प हरत देवेन्द्र को कुब्जा मन-बस लाय।
करत कंस चाणूर वध श्री अक्रूर सहाय॥
नव-नीरद-छवि धर मधुर-गोप वेष परमेश।
मोर मुकुट वन माल धरि हरि विहरत व्रज देश॥
पीत-वसन श्रीवत्स उर कर-धर वेणु—रसाल।
गो गोपी गोपाल गण राजत मदन गोपाल॥
मदन मोहन विहरत विमल बृन्दा विपिन मँझार।
राजत मधुपुर में सुघर श्री यदुराज कुमार॥
सतभामा के प्राणपति रुक्मिणि रमण सुधीर।
काल प्रवल शिशुपाल के, पिता प्रद्युम्न वीर॥
धन्य द्वारका की प्रजा जिन सर्वस पितु मात।
भक्त वछल त्रिभुवन धनी अखिल लोक के नाथ॥
दन्तवक्र-अरि शाल्व उर-सालन श्री यदुराय।
महिषी-मोहन प्रेम धन साधुन सदा सहाय॥
विदुर सरलता पै बिके बने पार्थ के मीत।
धरा भार हारन धरम थापन नीत पुनीत॥
भीषम के आराध्य प्रभु त्रिभुवन विभु सुरनाथ।
मुनि जन गति दाता सदय, योगि ध्येय पद पाथ॥
राधापति रसमय रसिक नागर नवल अनूप।
कुसुमित कुंज बिहारि हरि जलधर श्यामल-रूप॥
दामोदर श्रीधर मधुर श्रीपति शालग्राम।
तारक ब्रह्म सनातन पूर्ण पुरुष घनश्याम॥
कृपा-कल्पतरु कमल-दल-लोचन श्रीहृषिकेश।
पतित-पावन गुरु ज्ञान गुण दाता सत उपदेश॥
चक्रपाणि, चिन्ता मणि चारु-चतुर्भुज-धारि।
दीनबन्धु यदु कुल तिलक, देवकि-सुवन मुरारि॥

कृष्ण नाम, लीला, चरित. महिमा, रूप अनन्त।
व्यास देव नारद सरिस मुनिहुँ न पायौ अन्त॥
भजहु नाम, चिन्तन मनन कीजै नामहिं सार।
कृष्ण नाम कौ अन्त ना, महिमा अमित अपार॥
सुवरन के सत भार अरु कोटिन कन्या दान।
सत गोदानहुँ होय ना कृष्ण नाम सम जान॥
जोय नाम सोइ कृष्ण है निष्ठा करि भज देख।
सङ्ग विराजै नाम के श्री हरि निहचैं लेख॥
पतित पावन हरि नाम कौ संकीर्तन सुनि कान।
श्रवण परत हरि नाम के पाप विमोचन जान॥
कृष्ण नाम जप जीव तू और मृषा जग काज।
भागन कौ मारग नहीं पिछु-लाग्यो जमराज॥
कृष्ण नाम, हरिनाम यह मधुर सुधा रसखान।
कृष्ण-भजन रत भक्त जो सोही चतुर सुजान॥
ब्रह्मादिक पाये नहीं देव थके धरि ध्यान।
ता हरि के बस करन कौं 'भजन' उपाय महान॥
तीखे नखन विदारते हिरणकशिपु कौ वक्ष।
अपने जन प्रहलाद की करी नरहरी रक्ष॥
छलन हेत बलिराज कौं वामन वपु हरि कीन।
दीन द्रौपदी लाज हित भये चीर लवलीन॥
अष्टोत्तर शत नाम नित पाठ करै जो कोय।
राधा कृष्ण पद पद्म की भक्ति उदै हिय होय॥
नन्द नँदन पूरन करैं भक्तन की अभिलाष।
जिन कंस मथुरा हन्यौ रावण लंक विनाश॥
हन्यौ बकासुर अघ कियौ भञ्जन कालिय मान।
नाम संकीर्तन कहत है द्विज हरि जग हित जान॥

अनुवादक "हरिकृष्ण कमलेश"

योगपीठ

श्री गोविन्द पदारविन्द सीस सिर नाऊँ।
श्री वृन्दावन विपिन मौलि वैभव कछु पाऊँ॥
कालिन्दी जहँ नदी नील निर्मल जल भ्राजै।
परम तत्व वेदान्त वेद्य इव रूप विराजै॥
रक्त-पीत-सित-असित लसित अम्बुजवन सोभा।
टोल टोल मद लोल भ्रमत मधुकर मधु लोभा॥
सारस अरु कलहंस कोक कोलाहल कारी।
अगनित लक्षण पक्षि जात कहि नहि मति हारी॥
पुलिन पवित्र विचित्र रचित नाना मनि मोती।
लज्जित ह्वै शशि सूर निरखि निसि वासर जोती॥
कंचन कलित गिलाइ लाइ बाँधे मनि कूलन।
तीर तीर चतुर सुचारु नाना द्रुम मूलन॥
नव नग शोभा विविध भाति नव पल्लव पत्रा।
रङ्ग रङ्ग के फूल मनहुँ विधि निर्मित चित्रा॥
कल कलधौत लता प्रतान तिनसौं लपटाने।
वर पराग के पुंज कुंज परत न पहिचाने॥
कहुँ कपूर पराग कहुँ कुंकुम के पंका;
कहुँ फटिक स्थल विमल मनहुँ अकलंक मयंका॥
कहुँ अमृत जल भरे विपुल पद्माकर ओड़े।
मरकत धसी किरन मानौ दुर्वांकुर बोड़े॥
इहि विधि चिंतामनिन भूमि संतत तहं सोहै।
षट रितु सेवत नित्त कहत उपमा को कोहै॥
जहँ केकी कुल निर्तत तहँ पिक पंचम गावत।
परत भृंग उपाङ्ग सबद उघटत पारावत॥

कीर प्रशंसा करत भरत निर्झर मृदङ्ग धुनि ।
रीझ रीझ सिर धुनत वृक्ष संगीत रीति सुनि ॥
थिरचर मन उल्लास विलास विविध तहँ दरसै ।
मन्द पवन वस परसि लता कुसुमांजलि वरसै ॥
नित्यानन्द कदम्ब केलि वृन्दावन सोभा ।
कोटि कोटि सुरराज रङ्क ह्वै लागत लोभा ॥
कल्पद्रुमन की छांह माँह मनि मंडप भारी ।
जगमग जगमग जोति होति सोभा सुखकारी ॥
ता मंडप महँ योगपीठ पङ्कज रुचि लागि ।
ताके मन में उदय होत जो कोउ बड़ भागि ॥
ताके पत्र विचित्र सहस्र मध्य किंजल्कै ।
पद्मराग की भांति अग्र मुक्ता मणि झलकै ॥
कनक वरन कर्निका कील वज्रन की सोहै ।
मन्त्र दशाक्षर रूप कहन महिमाको को है ॥
वनिता जन गन कोटि कोटि संतत ता माहीं ।
उपमाको रति रमा उमा रम्भादिक नाहीं ॥
वरन वरन अम्बर सुरङ्ग कंचुकि तन गाढी ।
मञ्जन अंजन तिलक हार सोभा सुठि वाढी ॥
अङ्ग अङ्ग सोभा समूह श्रेणी रुचि वाढी ।
मनहुँ माधुरी सिंधु हू ते अवहीं मथि काढी ॥
सुन्दर नव युवराज विराजत तिनहि मँझारी ।
रूप अनूपम कथन काज सुरसुति पचिहारी ॥
नील जलद तन स्याम धाम अभिराम पीत पट ।
सिखि सिखंड सेखर ललाट रहीं छुटि अलकनट ॥
विविध सुदेस सुन्दर सुरङ्ग कुंकुम तमाल दल ।
ललित लोल डोलत कपोल विंवित मनिकुंडल ॥

भ्रुकुटि भङ्ग लघु लघु तरङ्ग लोचन सुको [illegible]द ।
चपल चारु चितवनि चिताइ गत होत मदनमद ॥
शुक नासा मुक्ता प्रकाश उपमा मन मेरे ।
मनहुँ असुर गुरु आय अङ्क बैठ्यो विधु केरे ॥
अधर मधुर अरुणिमा जोर वंधुक नहि पावै ।
विद्रुम विंव जवा प्रसून ऊनत्ता जनावै ॥
मुक्ता हीर अनार बुंद दंतन पर वारौं ।
कंवु कंठ कौस्तुभ मयूख रुचि कहत न पारौं ॥
गज सुंडाकृति वाहुदंड केयूर रहे वन ।
मधि हीरा पट कौन कौन मनि कहै और गनि ॥
पहुँचनि पहुँची वर जराय मुद्रिका रही फवि ।
करपल्लव नख जोति जात नक्षत्र पंक्ति दवि ॥
कुंद दाम वनदाम दाम गुंजा मनिकी उर ।
तार हार विस्तार चारु सुभ ढ़रत हिये पर ॥
स्तन दक्षिण श्रीवत्स वाम सोहै श्रीरेखा ।
मधि चौकी की चमक चाहि गृह थके असेषा ॥
त्रिवलि वलित रोमावलि नाभि आवर्त्त समाना ।
चलदल दल आकार उदर घटना मन माना ।
चित्रित अङ्ग पटीर कटी तट घटी सुहाई ।
मंद पवन वस थरहराति प्रमुदा मधि आई ॥
मनि किंकिनि गुण तड़ित दाम सम वनी नितंवन ।
उरु जानु जङ्घा सुगुल्फ सोभा अवलम्वन ॥
नूपुर रव झन झननकार गुरु सिक्ष्य हंसकुल ।
वार वार अभ्यास करत हारे न लही तुल ॥
जल कमल स्थल कमल जीति श्री वस करि राखी ।
कविवर वचन प्रमाण मानि बोलत है साखी ॥

मुरलीधर वर अधर धरी मुरली अति नीकी।
नादामृत बरसाय हरत सुधि बुधि सबही की॥
वाम भाग सौभाग सीम श्रीराधा रमनिमनि।
ताके नव नव प्रीति राग रहि पिय तन मनसनि॥
अहिकुल अलिकुल वरहिकुल केश वेश लखि लाज।
रहे रसामहि कमलमहि निरजन बन महँ भाजि॥
वदन सदन आनन्द चंद चारुता लजानी।
नैंन मैन सरपैन भौंह धनुही जनु तानी॥
मृगमद तिलक ललाट पट ताटङ्क श्रवण वनि।
खुलि खुटिलाभु लमुली अलक झलमलत महामनि॥
नासा मोती अधर भासता सित थरहरई।
दसन दाडिमी बीज मंजुता बोल मुखरई॥
चिबुक चारु रुचि रुचिर चकित प्रीतम छबि जो है।
स्यामबिंदु सुखकन्द नन्दनन्दन मन मोहै॥
नील सार सोभा अपार वेनी वनी भारी।
गौर गात गाती सुजात मोहित रतनारी॥
कंठ श्री मुक्तान माल चौंकी चमकती।
भुज मृणाल नव लाल वलित वलयनकी पंक्ती॥
मनि मुद्रिक केयूर कमल करपल्लव राते।
नखर सिखर माणिक्य स्याम अन्तर अरुझाते॥
रसना रसद निनाद वाद मनमथ सौं ठान्यौ।
रंभा खंभ समान जङ्घ सुन्दर मन मान्यौ॥
चरन कञ्ज मञ्जीर हंस कूजित सम बाजे।
नख मानिक मद जीति राग तल अधिक विराजै॥
यह विधि युगल किशोर जोर संतत तँह सोभै।
भाव सहित भावना करत कहि को नहि लोभै॥

जो इहि विधि निसि द्योस चलत बैठे अरु ठाढ़े।
करहि विचार विकार और तौवत मन बाढ़े॥
स्यानानंद मकरन्द सार जिनके मन माते।
भव दव दहन समूह तिनहि लागत नहिं ताते॥
श्रीवृन्दावन योगपीठ गोविन्द निवासा।
तहाँ श्रीगदाधर चरन सरन सेवा की आसा॥
इति श्री गदाधरभट्टजी कृत योगपीठ
वर्णन सम्पूर्णम्॥

श्रीगुरुवन्दना

आश्रय लै वन्दौ विमल गुरुवर के पद कञ्ज।
भाई, जासौं मिलत है कृष्ण प्रेम धन मञ्जु॥
जीव उधारन कारनै नन्द नँदन हरि राय।
भुवन मांहि प्रगटत-सदा गुरु रूप धरि आय॥
महिमा में गुरु कृष्ण दोउ सदा एक करि जान।
गुरु आज्ञा हिय धरि सदा सत्य रूप करि मान॥
सत्य ज्ञान करि गुरु वचन मांहि जासु विश्वास।
निहचै ताको होय है वृन्दा विपिन निवास॥
जाके प्रति गुरु देव जू होत रहै पर सन्न।
ताको चित्त न विघ्नसों होत कवौं अवसन्न॥
कृष्ण रोष जो करत तो राखत गुरु स टेक।
गुरु रूसै तो कृष्ण हूँ रखि न सकैं छनु एक॥
गुरू पिता, माता गुरू गुरु पालक पति मान।
गुरू बिना संसार मधि नहीं और गति जान॥
मानुस करि गुरुदेव कौं कबहुँ न मनमें जान।
श्रीगुरु कैं निन्दा वचन श्रवण माँहि नहि आन॥

गुरु निंदक जन को कहीं मुख न देखिये भूल ।
गुरु निंदा जहां होत तहां कबहुँ न जैये भूल ॥
हीन कर्म गुरु को कवौं देखि परै जो कोय ।
नहीं अवज्ञा कीजिये जान बूझि मन सोय ॥
श्रीगुरु के पद पद्म में जाकी निष्ठा भक्ति ।
तारन हित सब जगत कौं सो राखै बड़ शक्ति ॥
ऐसे गुरु पद कमल कौं नित कीजै परनाम ।
जासौं छूटैंगे सकल जगत जंत्रणा—काम ॥
श्री गुरु के पद पद्म दृढ करि प्रणवै जोय ।
सदा सीस धरि चरन में नित उठि वन्दौ सोय ॥
श्री गुरु के पद कमल की कृपा राखि हिय आस ।
श्री गुरु पद की बन्दना कहत सनातन दास ॥
इति श्रीसनातनगोस्वामीजी कृत वङ्गभाषा-
गुरुवन्दना की उलथा ।

श्री श्री गुरुदेवाष्टकम्

संसारदावानललीढ़लोकत्राणाय कारुण्य-घनाघनत्वम् ।
प्राप्तस्य कल्याणगुणार्णवस्य वन्दे गुरोः श्री चरणारविन्दम् ॥१
महाप्रभोः-कीर्त्तन-नृत्य-गीत-वादित्र माद्यन्मनसो रसेन ।
रोमांच-कम्पाश्रु तरङ्गभाजो वन्दे गुरोः श्री चरणारविन्दम् ॥२
श्रीविग्रहाराधन नित्यनानाशृंगारतन्मन्दिरमार्जनादौ ।
युक्तस्य भक्तांश्च नियुञ्जतोऽपि वन्दे गुरोः श्री चरणारविन्दम् ॥३
चतुर्विध श्री भगवत्प्रसाद स्वाद्वन्नतृप्तान् हरिभक्तसंघान ।
कृत्वैव तृप्ति भजतः सदैव वन्दे गुरोः श्रीचरणारविन्दम् ॥४

श्रीराधिकामाधवयोरपार माधुर्य्य लीला गुण रूप नाम्नां ।
प्रतिक्षण स्वादनलोलुपस्य वन्दे गुरोः श्री चरणारविन्दम् ॥५
निकुञ्जयुनो रतिकेलिसिद्धयै या यालिभिर्युक्तिरपेक्षणीया ।
तत्रातिदाक्ष्यादतिवल्लभस्य वन्दे गुरोः श्री चरणारविन्दम् ॥६
साक्षाद्धरित्वेन समस्त शास्त्रै रुक्तस्तथाभाव्यत एव सद्भिः ।
किन्तु प्रभो र्यः प्रिय एव तस्य वन्दे गुरोः श्रीचरणारविन्दम् ॥७
यस्य प्रसादाद् भगवत्प्रसादो यस्याप्रसादान्न गतिः कुतोऽपि ।
ध्यायंस्तुवंस्तस्य यशस्त्रिसन्ध्यं वन्दे गुरोः श्रीचरणारविन्दम् ॥८
श्रीमद्गुरोरष्टकमेतदुच्चै र्ब्राह्मे मुहूर्त्ते पठति प्रयत्नात् ।
यस्तेन वृन्दावननाथसाक्षात् सेवैव लभ्या जनुषोऽन्त एव ॥९
इति श्रीविश्वनाथ चक्रवर्त्तीचरणविरचितं
श्री गुरुदेवाष्टकं सम्पूर्णम् ॥

------

* श्री श्री शचीतनयाष्टकम् *

उज्वल वरण गौरवरदेहं विलसति निरवधि भावविदेहम् ।
त्रिभुवन पावन कृपयालेशं तं प्रणमामि च श्रीशचीतनयम् ॥
गदगद अन्तर भाव विकारं दुर्जन तर्जन नाद विशालं ।
भव भय- भञ्जन कारण करुणं तं प्रणमामि च श्रीशचीतनयम् ।
अरुणाम्बरधरचारु कपोलं इन्दुविनिन्दित नखचय रुचिरं ।
जल्पित निजगुण नाम विनोदं तं प्रणमामि च श्रीशचीतनयम्
विगलित नयन कमल जलधारं भूषण नवरस भाव विकारं ।
गति अतिमन्थर नृत्य विलासं तं प्रणमामि च श्रीशचीतनयम् ॥
चञ्चलचारु चरणगति रुचिरं मञ्जीर रञ्जित पदयुगमधुरं ।
चन्द्रविनिन्दित शीतल वदनं तं प्रणमामि च श्रीशचीतनयम् ॥
धृत कटिडोर कमण्डलु दण्डं दिव्य कलेवर मुण्डितमुण्डं ।
दुर्जनकल्मष खण्डनदण्डं तं प्रणमामि च श्रीशचीतनयम् ॥

भूषण भूरज अलकावलितं कम्पित बिम्बाधर वर रुचिरं ।
मलयज विरचित उज्वल तिलकं तं प्रणमामि च श्रीशचीतनयम् ॥
निन्दित अरुण कमल दल लोचनं आजानुलम्बित श्रीभुजयुगलं ।
कलेवर कैशोर नर्त्तकवेशं तं प्रणमामि च श्रीशचीतनयम् ॥
इति श्री सार्व्वभौमभट्टाचार्य्य विरचितं
श्रीशचीतनयाष्टकं सम्पूर्णम् ॥

श्री श्री चैतन्याष्टकम्

सदोपास्यः श्रीमान् धृतमनुजकायैः प्रणयितां
बहद्भिर्गीर्व्वाणै गिरिश परमेष्ठि प्रभृतिभिः ।
स्वभक्तेभ्यः शुद्धां निजभजनमुद्रामुपदिशन्
स चैतन्यः किं मे पुनरपि दृशो र्यास्यति पदम् ॥ १ ॥
सुरेशानां दुर्ग गतिरतिशयेनोपनिषदां
मुनीनां सर्वस्वं प्रणत पटलीनां मधुरिमा ।
विनिर्य्यासः प्रेम्नो निखिल पशुपालाम्बुजदृशां
स चैतन्यः किं मे पुनरपि दृशो र्यास्यति पदम् ॥ २ ॥
स्वरूपं बिभ्राणो जगदतुलमद्वैतदयितः
प्रपन्न श्री वासो जनित परमानन्द गरिमा ।
हरिर्दीनोद्धारी गजपतिकृपोत्सेकतरलः
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥ ३ ॥
रसोद्दामा कामार्व्बुद मधुर धामोज्वलतनु-
र्यतीनामुत्तंस स्तरणिकर विद्योति वसनः ।
हिरण्यानां लक्ष्मीभरमभिभवन्नांगिकरुचा
स चैतन्यः किं मे पुनरपि दृशो र्यास्यति पदम् ॥ ४ ॥
हरेकृष्णेत्युच्चैः स्फुरितरसनो नामगणना-
कृत ग्रंथिश्रेणी सुभगकटिसूत्रोज्वलकरः ।

विशालाक्षो दीर्घागलयुगलखेलाञ्चितभुजः
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥ ५ ॥
पयोराशेस्तीरे स्फुरदुपवनालींकलनया
मुहुर्वृन्दारण्य स्मरण जनित प्रेमविवशः ।
क्वचित्कृष्णावृत्तिप्रचलरसनो भक्तिरसिकः
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥ ६ ॥
रथारूढस्यारादधिपदवि नीलाचलपते
रदभ्रप्रेमोर्म्मि स्फुरित नटनोल्लास विवशः ।
सहर्षं गायद्भिः परिवृततनुर्वैष्णवजनैः
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥ ७ ॥
भुवं सिञ्चन्नश्रु श्रुतिभिरभितः सान्द्रपुलकैः
परीतांगो नीपस्तवक नव किञ्जल्कजयिभिः ।
घनस्वेद-स्तोम-स्तिमित तनुरुत्कीर्तनसुखी
स चैतन्यः कि मे पुनरपि दृशोर्यास्यति पदम् ॥ ८ ॥
अधीते गौरांग स्मरणपदवींमङ्गलतरं
कृती यो विश्रम्भ स्फुरदमलधीरष्टकमिदम् ।
परानन्दे सद्यस्तदमलपदाम्भोजयुगले
परिस्फारा तस्य स्फुरतु नितरां प्रेमलहरी ॥ ९ ॥
इति श्रीमद्रूपगोस्वामि विरचितं श्री शचीतनयाष्टकं सम्पूर्णम् ॥

॥ श्री श्रीगौरांगस्तवकल्पतरुः ॥

गतिं दृष्ट्वा यस्य प्रमदगजवर्य्येऽखिलजना
मुखञ्च श्रीचन्द्रोपरि दधति थुत्कारनिवहम् ।
स्वकान्त्या यः स्वर्णाचलमधरयच्चैधु च वच
स्तरंगैगौंरांगो हृदय उदयन्मां मदयति ॥ १ ॥

नवविविधरत्नैरिव ब्रज
अलंकृत्याऽमानं वचनकम्पाश्रुपुलकैः ।
द्विवर्णत्व स्तम्भस्फुट शितिगिरिपतेर्निर्भरमुदे
हसन् स्विद्यन् नृत्यन् उदयन्मां मदयति ॥ २
पुरः श्रीगौरांगो हृदय वारिभिरलं
रसोल्लासैस्तिर्य्यग्गातिभिरभितो
दृशोः सिञ्चल्लोकाऽरुणजलयन्त्रत्वमितयोः ।
मुदा दन्तैर्दष्ट्वा मधुरमधरं कम्पचलितै
र्नटन् श्रीगौरांगो हृदय उदयन्मां मदयति ॥ ३
क्वचिन्मिश्रावासे व्रजपतिसुतस्योरुविरहात्
श्लथच्छ्रीसन्धित्वादधदधिकदैर्घ्यं भुजपदोः ।
लुठन् भूमौ काक्का विकलविकलं गद्गदवचा
रुदन् श्रीगौरांगो हृदय उदयन्मां मदयति ॥ ४
अनुद्घाट्य द्वारत्रयमुरु च भित्तित्रयमहो
विलंघ्योच्चैः कालिंगिकसुरभिमध्ये निपतितः ।
तनूद्यत्संकोचात् कमठ इव कृष्णोरुविरहाद-
विराजन् गौरांगो हृदय उदयन्मां मदयति ॥ ५ ॥
स्वकीयस्य प्राणार्बुदसदृशगोष्ठस्य विरहात्
प्रलापानुन्मादात् सततमतिकुर्व्वन् विकलधीः ।
दधद्भित्तौ शश्वद्वदनविधुघर्षेण रुधिरं
क्षतोत्थं गौरांगो हृदय उदयन्मां मदयति ॥ ६ ॥
क मे कान्तः कृष्णस्त्वरितमिह तं लोकय सखे
त्वमेवेति द्वाराधिपमभिदधन्नुन्मद इव ।
द्रुतं गच्छ द्रष्टुं प्रियमिति तदुक्तेन धृततद्
भुजान्तो गौरांगो हृदय उदयन्मां मदयति ॥ ७ ॥
समीपे नीलाद्रेश्चटकगिरिराजस्य कलना—
दये गोष्ठे गोवर्द्धनगिरिपतिं लोकितुमितः ।

व्रजन्नस्मीत्युक्त्वा प्रमद इव धावन्नवधृतो
गणैः स्वैर्गौरांगो हृदय उदयन्मां मदयति ॥ ८ ॥
अलं दोलाखेला महसि वरतन्मण्डपतले
स्वरूपेण स्वेनापरनिजगणेनापि मिलितः ।
स्वयं कुर्व्वन्नाम्नामतिमधुरगानं मुररिपोः
सरङ्गो गौरांगो हृदय उदयन्मां मदयति ॥ ९ ॥
दयां यो गोविन्दे गरुड़ इव लक्ष्मीपतिरलं
पुरीदेवे भक्तिं य इव गुरुवर्य्ये यदुवरः ।
स्वरूपे यः स्नेहं गिरिधर इव श्रीलसुबले
विधत्ते गौरांगो हृदय उदयन्मां मदयति ॥ १० ॥
महासम्पदावादपि पतितमुद्धृत्य कृपया
स्वरूपे यः स्वीये कुजनमपि मां न्यस्य मुदितः ।
उरो गुंजाहारं प्रियमपि च गोवर्द्धनशिलां
ददौ मे गौरांगो हृदय उदयन्मां मदयति ॥ ११ ॥
इति श्रीगौरांगोद्धर्तविविधसद्भावकुसुम
प्रभाभ्राजत्पद्यावलिललितशाखं सुरतरुं ।
मुहुर्योऽतिश्रद्धौषधिवर–वलत्पाठसलिलै
रलं सिञ्चेद् विन्देत् सरसगुरुतल्लोकनफलम् ॥ १२ ॥

इति श्रीमद्रघुनाथदासगोस्वामि विरचितः
श्रीगौरांग स्तवकल्पतरुः समाप्तः ॥

श्री श्री नवद्वीपचन्द्राष्टकम्

कनक रुचिर गौरः सर्व्व चित्तैकचौरः
प्रकृतिमधुरदेहः पूर्णलावण्यगेहः ।
कलित ललितरूपः लुब्धकन्दर्पभूपः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ १ ॥

बहुलचिकुरबन्धः स्निग्धमुग्धप्रबन्धः
प्रसरपुरपुरन्ध्रीचित्तसन्धानमन्त्री ।
विहित विविधवेशद्योतिताशेषदेशः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ २ ॥
विकशितशतपत्रद्योतिविस्फारनेत्रः
प्रिय मृदुल पवित्र स्निग्धदृक् प्रेमपात्रः ।
अति मधुरचरित्रः प्रोल्लसच्चारुगात्रः-
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ३ ॥
मलयजकरवीरश्च्छिद्विलासातिधीरः
सुविमलसितवस्त्रः प्रान्तवस्त्रानुरक्तः ।
रभसमयबिहारः पूर्णलीलावतारः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ४ ॥
सकलरसविदग्धः सर्वभावप्रशुद्धः
सकलसुखविनोदः ख्यातनृत्यप्रमोदः ।
सकलसुखदनामा धन्यतारुण्य धामा
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीषचन्द्रः ॥ ५ ॥
अविरतगलदस्रः प्रेमधारासहस्रः
स्नापित सकलदेशः ख्यातनामोपदेशः ।
भुवनविदितसर्वप्राणिनिस्तारगर्व्वः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ६ ॥
घन पुलककदम्बः स्थूलमुक्तासमाम्भ
स्नपिततरहृदोरः प्रेमहुंकारघोरः ।
सदय मधुरमूर्ति-र्बिश्वबिख्यातकीर्त्तिः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ७ ॥
अखिल भुवनभर्त्ता दुर्गतित्राणकर्त्ता
कलिकलुषनिहन्ता दीनदुःखैकशान्ता ।

निरवधि निज गाथा कीर्त्तनानन्द दाता
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ८ ॥
सुरमुनिगणबन्धुः प्रेमभक्त्येकसिन्धुः
प्रकट सुरभिनन्द श्रीलपादारविन्दः ।
नटनमधुरमन्दः सुप्रगाढ प्रबन्धः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ९ ॥
सकलनिगमसारः प्रेमपूर्णावतारः
प्रचुरगुणगभीरः सर्व्वसन्धान धीरः ।
अधमपतित बन्धुः पूर्णकारुण्यसिन्धुः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ १० ॥
मधुरिमनि मनोज्ञस्ताण्डवाद्यन्तविज्ञ
स्तरुणिमणि विचित्रः प्रेमनिस्तारपात्रः ।
महिमनि निजनाम ग्राहिसम्पूर्णकामः
स्फुरतु हृदि नटेन्द्रः श्रीनवद्वीपचन्द्रः ॥ ११ ॥
श्रीगौरांगनटेन्द्रस्य स्तुतिमेतामभीष्टदां ।
यः पठेत् परमप्रीतः स प्रेमसुखभाग् भवेत् ॥ १२ ॥
इति श्री रघुनन्दन ठक्कुर विरचितं श्री श्री नवद्वीप
चन्द्राष्टकं सम्पूर्णम् ॥

॥ श्री श्रीनित्यानन्दाष्टकम् ॥

शरच्चन्द्रभ्रान्ति स्फुरदमलकान्ति गजगतिं
हरिप्रेमोन्मत्तं धृतपरमसत्वं स्मितमुखं ।
सदाघूर्णन्नेत्रं करकलितबेत्रं कलिभिदं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ १ ॥
रसानामागारं स्वजनगणसर्व्वस्वमतुलं
तदीयैक प्राणप्रतिमवसुधा जान्हवापतिं ।

सदा प्रेमोन्मादं परमविदितं मन्दमनसां
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ २ ॥
शची सूनु प्रेष्ठं निखिलजगदिष्टं सुखमयं
कलौ मज्जजीवोद्धरण करुणोद्दाम करुणं ।
हरेराख्यानाद्वा भवजलधि गर्व्वोन्नति हरं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ३ ॥
अये भ्रातर्नृणां कलिकलुषिणां किन्नु भविता
तथा प्रायश्चित्तं रचय यदनायासत इमे ।
व्रजन्ति त्वामित्थं सह भगवता मन्त्रयति यो
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ४ ॥
यथेष्टं रे भ्रातः ! कुरु हरि हरि ध्वानमनिशं
ततो वः संसाराम्बुधितरणदायो मयि लगेत् ।
इदं वाहुस्फोटैरटति रटयन् यः प्रतिगृहं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ५ ॥
वलात्संसाराम्भोनिधि हरणकुम्भोद्भवमहो
सतां श्रेयः सिन्धुन्नतिकुमुदबन्धुं समुदितं ।
खलश्रेणी स्फुर्ज्जत्तिमिरहर सूर्य्य प्रभमहं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ६ ॥
नटन्तं गायन्तं हरिमनुवदन्तं पथि पथि
व्रजन्तं पश्यन्तं स्वमपि नदयन्तं जनगणम् ।
प्रकुर्व्वन्तं सन्तं सकरुणदृगन्त प्रकलनाद्
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ७ ॥
सुबिभ्राणं भ्रातुः करसरसिजं कोमलतरं
मिथो वक्त्रालोकोच्छलित परमानन्द हृदयम् ।
भ्रमन्तं माधुर्य्यैरहह मदयन्तं पुरजनान्
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ ८ ॥

रसानामाधारं रसिकवर सद्वैष्णवधनं
रसागारं सारं पतिततततितारं स्मरणतः ।
परं नित्यानन्दाष्टकमिदमपूर्व्वं पठति य
स्तदंघ्रिद्वन्द्वाब्जं स्फुरतु नितरां तस्य हृदये ॥
इति श्रीमद्वृन्दावनदासठक्कुरविरचितं
श्री श्रीनित्यानंदाष्टकं सम्पूर्णम् ।

※ श्री श्री मदद्वैताष्टकम् ※

गंगातीरे तत्पयोभिस्तुलस्याः पत्रैः पुष्पैः प्रेमहुंकारघोषैः ।
प्राकट्यार्थं गौरमाराधयद्यः श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥१
यद्धुंकारैः प्रेमसिन्धोर्विकारैराकृष्टः सन् गौरगोलोकनाथः ।
आविर्भूतः श्रीनवद्वीप मध्ये श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥२
ब्रह्मादीनां दुर्लभ प्रेमपूरै रादीनां यः प्लावयामास लोकं ।
आविर्भाव्य श्रीलचैतन्यचन्द्रं श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥३
श्रीचैतन्यः सर्वशक्ति प्रपूर्णो यस्यैवाज्ञा मात्रतोऽन्तदधेऽपि ।
दुर्विज्ञेयं यस्य कारुण्य कृत्यं श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥४
सृष्टिस्थित्यन्तं विधातुं प्रवृत्ताःयस्यांशांशा ब्रह्मविष्णवश्वराख्याः
येनाभिन्नास्तं महाविष्णुरूपं श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥५
कस्मिंश्चिद्यःश्रूयते चाश्रयत्वाच्छम्भोरित्थं शाम्भवं नाम धाम
सर्वाराध्यं भक्तिमात्रैकसाध्यं श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥६
सीता नाम्नी प्रेयसी प्रेमपूर्णा पुत्रो यस्याप्यच्युतानन्दनामा ।
श्रीचैतन्यप्रेमपूर प्रपूर्णः श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥७
नित्यानन्दाद्वैततोऽद्वैतनामा भक्त्याख्यानाद् यः सदाचार्य्यनामा
शश्वच्चेतःसञ्चरद्गौरधामा श्रीलाद्वैताचार्य्यमेतं प्रपद्ये ॥८

प्रातः प्रीतः प्रत्यहं संपठेद्यः सीतानाथस्याष्टकं शुद्ध बुद्धिः
सोऽयं सम्यक् तस्य पादारविन्दे विन्दन् भक्तिं तत्प्रियत्वं प्रया
इति श्रीसार्व्वभौमभट्टाचार्य्य विरचितं
श्री श्रीमदद्वैताष्टकं सम्पूर्णम् ॥

श्री श्रीगदाधरपण्डिताष्टकम्

सद्भक्तियोगलासिनं सदा व्रजे विहारिणं
हरिप्रियागणाग्रगं शचीसुतप्रियेश्वरम् ।
स राध कृष्णसेवनप्रकाशकं महाशयं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुम् ॥ १ ॥
नवोज्वलादिभावना विधान कर्म्मपारगं
विचित्र गौरभक्तिसिन्धु रङ्गभङ्ग लासिनम् ।
सुरागमार्गदर्शकं व्रजादिवासदायकं ।
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ २ ॥
शचीसुतांघ्रिसार भक्तवृन्द वन्द्य गौरवं
गौरभावचित्तपद्म मध्य कृष्णसुवल्लभम् ।
मुकुन्दगौररूपिणं स्वभावधर्म्मदायकम्
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ३ ॥
निकुञ्जसेवनादिक प्रकाशनैक कारणं
सदा सखीरतिप्रदं महारसस्वरूपकम् ।
सदाश्रितांघ्रि पुण्डरीकदं सदा गुरुं वरं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ४ ॥
महाप्रभोर्म्महारस प्रकाशनाकुरं प्रियं
सदा महारसांकुर प्रकाशनादि वासनम् ।
महाप्रभोर्व्रजांगनादि भावमोदकारकं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ५ ॥

द्विजेन्द्रवृन्दवन्द्य पादयुग्म भक्तिवर्द्धकं
निजेषु राधिकात्मता वपुः प्रकाशनाग्रहम् ।
अशेषभक्तिशास्त्र शिक्षयोज्वलामृतप्रदं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ६ ॥
मुदा निजप्रियादिकस्वपादपद्मसीधुभि
र्महारसार्णवामृत प्रदेष्टगौरभक्तिदम् ।
सदाष्टसात्विकान्वितं निजेष्टभक्तिदायकं
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ७ ॥
मदीयरीतिरागरङ्ग भङ्गदिग्धमानसो ।
नरोऽपि याति तूर्णमेव नार्य्यभावभाजनं ।
तमुज्वलाक्तचित्तमेतु चित्तमत्त षट्पदो
भजाम्यहं गदाधरं सुपण्डितं गुरुं प्रभुं ॥ ८ ॥
महारसामृतप्रदं सदा गदाधराष्टकं
पठेत्तु यः सुभक्तितो व्रजांगनागणोत्सवम् ।
शचीतनूज पादपद्मभक्तिरत्नयोग्यतां
लभेत राधिका गदाधरांघ्रिपद्मसेवया ॥ ९ ॥
इति श्रीलरूपगोस्वामिविरचितं
श्रीश्रीगदाधरपण्डिताष्टकं
समाप्तम् ॥

श्री श्री वासाष्टकम्

आश्रयामि श्री श्रीवासं तमाद्यं पण्डितं मुदा ।
शुक्लाम्बरधरं गौरं गौरभक्तिप्रदायकम् ॥ १ ॥
श्रीगौरस्य नवद्वीपलीलाकीर्त्तनसम्पदि ।
यः प्रधानतया ख्यातः स श्रीवासो गतिर्म्मम ॥ २ ॥

पुत्रशोकोऽपि नास्पृशत् ।
श्रीगौरकीर्त्तनानन्दे पुत्रशोकोऽपि नास्पृशत् ।
यं श्रीवासं भक्तराजं तं नमामि पुनः पुनः ॥ ३ ॥
आदौ वासस्तु श्रीहट्टे भागीरथ्यास्तटे ततः ।
कुमारहट्टे यस्यासीत् स मे गौरगतिर्गतिः ॥ ४ ॥
श्रीरामः श्रीपतिश्चैव श्रीनिधिश्चेति सत्तमाः ।
श्रीवासभ्रातरो ज्ञेयाः श्रीवासं नौमि तद्वरं ॥ ५ ॥
पुरा नारदरूपेण हरिनामसुधाक्षरैः ।
यो जगत् प्लावयामास स श्रीवासोऽधुना गतिः ॥ ६ ॥
यत्पत्नी मालिनीदेवी श्रीगौरांगमतोषयत् ।
स्वहस्त पक्क भक्ताद्यैः स श्रीवासो गतिर्म्मम ॥ ७ ॥
पतिवद्गौरांगगतिर्मालिनी गौड़विश्रुता ।
तत्पादपद्मसविधे प्रणतिर्म्मे सहस्रशः ॥ ८ ॥
श्रीचैतन्यप्रियतमं वन्दे श्रीवासपण्डितं ।
यत्कारुण्य कटाक्षेण श्रीगौरांगे रतिर्भवेत् ॥ ९ ॥

इति श्रीवासाष्टकं सम्पूर्णम् ॥

---[❀]---

श्री श्रीषड् गोस्वाम्यष्टकम्

कृष्णोत्कीर्तनगाननर्त्तनपरौ प्रेमामृताम्भोनिधी
धीरौ धीरजनप्रियौ प्रियकरौ निर्म्मत्सरौ पूजितौ ।
श्रीचैतन्यकृपाभरौ भुवि भुवो भारावहन्तारकौ
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ १ ॥
नानाशास्त्रविचारणैकनिपुणौ सद्धर्म्मसंस्थापकौ
लोकानां हितकारिणौ त्रिभुवने मान्यौ शरण्याकरौ ।
राधाकृष्णपदारविन्दभजनानन्देन मत्तालिकौ
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ २ ॥

श्रीगौरांगगुणानुवर्णनविधौ श्रद्धा-समृद्धयन्वितौ
पापोत्तापनिकृन्तनौ तनुभृतां गोविन्दगानामृतैः ।
आनन्दाम्बुधिवर्द्धनैकनिपुणौ कैवल्यनिस्तारकौ
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ ३ ॥
त्यक्त्वा तूर्णमशेषमण्डलपतिश्रेणीं सदा तुच्छवत्
भूत्वा दीनगणेशकौ करुणया कौपीनकन्थाश्रितौ ।
गोपीभावरसामृताब्धिलहरी कल्लोलमग्नौ मुहु
र्वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ ४ ॥
कूजत्कोकिल हंस सारसगणाकीर्णे मयूराकुले
नानारत्ननिबद्धमूलविटप श्रीयुक्तवृन्दावने ।
राधाकृष्णमहर्निशं प्रभजतौ जीवार्थदौ यौ मुदा
वन्दे रूपसनातनौ रघुयुगौ श्रीजीव गोपालकौ ॥ ५ ॥
संख्यापूर्व्वक नाम गाननतिभिः कालावसानीकृतौ
निद्राहारविहारकादिविजितौ चात्यन्तदीनौ च यौ,
राधाकृष्णगुणस्मृते र्मधुरिमानन्देन सम्मोहितौ
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ ६ ॥
राधाकुण्डतटे कलिन्दतनयातीरे च वंशीवटे
प्रेमोन्मादवशादशेषदशया ग्रस्तौ प्रमत्तौ सदा ।
गायन्तौ च कदा हरेर्गुणवरं भावाभिभूतौ मुदा
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ ७ ॥
हे राधे व्रजदेविके च ललिते हे नन्दसूनो कुतः
श्री गोवर्द्धनकल्पपादपतले कालिन्दिवन्ये कुतः ।
घोषन्ताविति सर्वतो व्रजपुरे खेदैर्महाविह्वलौ
वन्दे रूपसनातनौ रघुयुगौ श्रीजीवगोपालकौ ॥ ८ ॥

इति श्रीलश्रीनिवासाचार्य्यं प्रभु विरचितं
श्रीषड्गोस्वामिगुणलेशसूचकाष्टकं सम्पूर्णम् ॥

॥ श्री श्रीनवद्वीपाष्टकम् ॥

श्रीगौडदेशे सुरदीर्घिकायास्तीरेऽतिरम्ये पुरुपुण्यमय्याः ।
लसन्तमानन्दभरेण नित्यं तं श्रीनवद्वीपमहं स्मरामि ॥१
यस्मै परव्योम वदन्ति केचित् केचिच्च गोलोक इतीरयन्ति ।
वदन्ति वृन्दावनमेव तज्ज्ञास्तं श्रीनवद्वीपमहं स्मरामि ॥२
यः सर्वदिक्षु स्फुरितैः सुशीतैर्नानाद्रुमैः सूपवनैः परीतः ।
श्रीगौरमध्याह्नविहारपात्रै स्तं श्रीनवद्वीपमहं स्मरामि ॥३
श्रीस्वर्णदी यत्र विहारभूमिः सुवर्णसोपाननिबद्धतीरा ।
व्याप्तोर्म्मिभिर्गौरवगाहरूपै स्तं श्रीनवद्वीपमहं स्मरामि ॥४
महान्त्यनन्तानि गृहानि यत्र स्फुरन्ति हैमानि मनोहराणि ।
प्रत्यालयं यं श्रयते सदा श्री स्तं श्रीनवद्वीपमहं स्मरामि ॥५
विद्या-दया-क्षान्ति मुखैः समस्तैःसद्भिर्गुणै र्यत्र जनाःप्रपन्नाः ।
संस्तूयमाना ऋषिदेवसिद्धैस्तं श्रीनवद्वीप महं स्मरामि ॥६
यस्यान्तरे मिश्र पुरन्दरस्य स्वानन्दसाम्यैकपदं निवासः ।
श्रीगौरजन्मादिकलीलयाढ्यस्तं श्रीनवद्वीपमहं स्मरामि ॥७
गौरो भ्रमन यत्र हरिः स्वभक्तैः संकीर्त्तन प्रेमभरेण सर्व्वम् ।
निमज्जयत्युल्लसदुन्मदाब्धौ तं श्रीनवद्वीपमहं स्मरामि ॥८
एतन्नवद्वीपविचिन्तनाढ्यं पद्याष्टकं प्रीतमनाः पठेद्यः ।
श्रीमच्छचीनन्दनपादपद्मे सुदुर्लभं प्रेम समाप्नुयात् सः ॥

॥ इति श्री श्री नवद्वीपाष्टकं सम्पूर्णम् ॥

॥ श्री श्रीशिक्षाष्टकम् ॥

चेतो दर्पणमार्ज्जनं भवमहादावाग्निनिर्व्वापनं
श्रेयः कैरव चन्द्रिकावितरणं विद्यावधूजीवनम् ।

आनन्दाम्बुधिवर्द्धनं प्रतिपदं पूर्णामृतास्वादनं
सर्व्वात्मस्नपनं परं विजयते श्रीकृष्णसंकीर्त्तनं ॥ १ ॥
नाम्नामकारि बहुधा निजसर्व्वशक्ति
स्तत्रार्पिता नियमितः स्मरणे न कालः ।
एतादृशी तव कृपा भगवन्! ममापि
दुर्द्दैवमीदृशमिहाजनि नानुरागः ॥ २ ॥
तृणादपि सुनीचेन तरोरिव सहिष्णुना ।
अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥ ३ ॥
न धनं न जनं न सुन्दरीं कवितां वा जगदीश कामये ।
मम जन्मनि जन्मनीश्वरे भवताद्भक्तिरहैतुकी त्वयि ॥ ४ ॥
अयि नन्दतनूज! किंकरं पतितं मां विषमे भवाम्बुधौ ।
कृपया तव पादपङ्कजस्थितधूलीसदृशं विचिन्तय ॥ ५ ॥
नयनं गलदश्रुधारया वदनं गद्गदरुद्धया गिरा ।
पुलकैर्निचितं वपुः कदा तव नाम ग्रहणे भविष्यति ॥ ६ ॥
युगायितं निमिषेण चक्षुषा प्रावृषायितं ।
शून्यायितं जगत्सर्व्वं गोविन्दविरहेण मे ॥ ७ ॥
आश्लिष्य वा पादरतां पिनष्टुमामदर्शनान्मर्म्महतां करोतु वा
यथा तथा वा विदधातु लम्पटो मत्प्राणनाथस्तु स एव नापरः ।
इति श्री कृष्णचैतन्यमहाप्रभोर्मुखाब्जविगलितं
श्री श्रीशिक्षाष्टकं सम्पूर्णम् ॥

श्री श्री जगन्नाथाष्टकम्

कदाचित् कालिन्दीतटविपिन सङ्गीततरलो
मुदाभीरीनारीवदनकमलास्वादमधुपः ।
रमाशम्भु ब्रह्मामरपतिगणेशार्च्चितपदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ १ ॥

भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकूलं नेत्रान्ते सहचरकटाक्षं विदधते ।
सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ३ ॥
महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादान्तः सहजबलभद्रेण बलिना ।
सुभद्रामध्यस्थः सकलसुरसेवावसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ २ ॥
कृपापारावारः सजलजलदश्रेणिरुचिरो
रमावाणीरामः स्फुरदमलपङ्केरुहमुखः ।
सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ४ ॥
रथारूढो गच्छन् पथि मिलितभूदेवपटलैः
स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसदयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ५ ॥
परं ब्रह्मापीडः कुवलयदलोत्फुल्लनयनो
निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दी राधा सरसवपुरालिङ्गनसुखो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ६ ॥
न वै याचे राज्यं न च कनकमाणिक्यविभवं
न याचेऽहं रम्यां सकलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ७ ॥
हर त्वं संसारं द्रुततरमसारं सुरपते !
हर त्वं पापानां विततिमपरां यादवपते !

अहो दीनेऽनाथे निहितचरणो निश्चितमिदं
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ ८ ॥
जगन्नाथाष्टकं पुण्यं यः पठेत् प्रयतः शुचिः ।
सर्व्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ॥ ९ ॥
इति श्री गौरचन्द्रविनीत श्रीभोजदेवकृत
श्रीजगन्नाथाष्टकं सम्पूर्णम् ।

श्री व्रजराजसुताष्टकम्

नवनीरद निन्दितकान्तिधरं रससागरनागरभूपवरं ।
शुभवङ्किमचारु शिखण्डशिखं भज कृष्णनिधिं व्रजराजसुतं ॥१
भ्रुविशङ्कितवङ्किमशक्रधनुं मुखचन्द्रविनिन्दितकोटिविधुं ।
मृदुमन्दसुहास्यसुभाष्ययुतं भज कृष्णनिधिं व्रजराजसुतं ॥२
सुविकम्पदनङ्गसदङ्गधरं व्रजवासिमनोहरवेशकरं ।
भृशलाञ्छितनीलसरोजदृशं भज कृष्णनिधिं व्रजराजसुतं ॥३
अलकावलिमण्डितभालतटं श्रुतिदोलितमाकरकुण्डलकं ।
कटिवेष्टितपीतपटं सुधटं भज कृष्णनिधिं व्रजराजसुतं ॥४॥
कलनूपुरराजितचारुपदं मणिरञ्जितगञ्जितभृङ्गमदं ।
ध्वजवज्रझषाङ्कितपादयुगं भज कृष्णनिधिं व्रजराजसुतं ॥५॥
भृशचन्दनचर्चितचारुतनुं मणिकौस्तुभगर्हितभानु तनुं ।
व्रजबालशिरोमणिरूपधृतं भज कृष्णनिधिं व्रजराजसुतं ॥७॥
सुरवृन्दसुवन्द्य मुकुन्दहरिं सुरनाथशिरोमणि सर्व्वगुरुं ।
गिरिधारि मुरारि पुरारिपरं भज कृष्णनिधिं व्रजराजसुतं ।६॥
वृषभानुसुतावरकेलिपरं रसराजशिरोमणिवेशधरं ।
जगदीश्वरमीश्वरमीड्यवरं भज कृष्णनिधिं व्रजराजसुतं ॥८
इति श्रीव्रजराजसुताष्टक
सम्पूर्णम् ॥

श्री श्री कुंजविहार्य्यष्टकम्

इन्द्रनीलमणिमञ्जुलवर्णः फुल्लनीपकुसुमाञ्चितकर्णः ।
कृष्णलाभिरकिशोररसि हारी सुन्दरो जयति कुंजविहारी ॥
राधिकावदनचन्द्रचकोरः सर्व्ववल्लववधूधृतिचौरः ।
चर्च्चरीचतुरताञ्चितचारी चारुतो जयति कुंजविहारी ॥
सर्वतः प्रथितकौलिकपर्व्व ध्वंसनेन हृत वासवगर्व्वः ।
गोष्ठरक्षणकृते गिरिधारी लीलया जयति कुंजविहारी ॥३
रागमण्डल विभूषितवंशी विभ्रमेण मदनोत्सवशंसी ।
स्तूयमान चरितः शुकसारी श्रेणिभिर्जयति कुंजविहारी ॥४
शातकुम्भरुचिहारिदुकूलः केकिचन्द्रकविराजित चूलः ।
नव्ययौवनलसद्व्रजनारी रञ्जनो जयति कुंजबिहारी ॥५॥
स्थासकीकृतसुगन्धिपटीरः स्वर्णकाञ्चिपरिशोभिकटीरः ।
राधिकोन्नत पयोधरधारी कुञ्जरो जयति कुञ्जविहारी ॥६॥
गैरधातुतिलकोज्वलभालः केलिचञ्चलितचम्पकमालः ।
अद्रिकन्दरगृहेष्वभिसारी सुभ्रुवां जयति कुंजविहारी ॥७॥
विभ्रमोच्चलदृगञ्चलनृत्य क्षिप्तगोपललनाखिलकृत्यः ।
प्रेममत्त वृषभानुकुमारी नागरो जयति कुञ्जविहारी ॥८॥
अष्टकं मधुरकुंजविहारि क्रीड़या पठति यः किल हारि ।
स प्रयाति विलसत् परभागं तस्य पादकमलार्च्चनरागम् ॥९॥
इति श्रीमद्रूपगोस्वामिविरचितं श्रीकुञ्जविहार्य्यष्टकं समाप्तम् ।

हरिकुसुमस्तवकं

गतिगञ्जितमत्ततरद्विरदं रदनिन्दितसुन्दरकुन्दमदं ।
मदनार्बुदरूपमदघ्नरुचिं रुचिरस्मितमञ्जरीमञ्जुमुखम् ॥१
मुखरीकृतवेणुहृतप्रमदं मदवल्गितलोचनतामरसं ।
रसपूरविकासककेलिपरं परमार्थपरायणलोकगतिम् ॥२

गतिमण्डितयामुनतीरभुवं भुवनेश्वरवन्दितचारुपदम् ।
पदकोज्वलकोमलकंठरुचं रचकान्तविशेषक वल्गुतरम् ॥३॥
तरलप्रचलाकपरीतशिखं शिखरीन्द्रधृतिप्रतिपन्नभुजम् ।
भुजंगेन्द्रफणांगणरंगधरं धरकन्दरखेलनलुब्धहृदम् ॥४॥
हृदयालुसुहृद्गणदत्तमहं महनीयकथाकुलधूतकलिम् ।
कलिताखिलदुर्जयवाहुवलं बलवल्लवशावकसंनिहितम् ॥५॥
हितसाधुसमीहित कल्पतरुं तरुणीगणनूतनपुष्पशरम् ।
शरणागत रक्षणदक्षतमं तमसाधुकुलोत्पलचण्डकरम् ॥६॥
करपद्ममिलत्कुसुमस्तवकं वकदानवमत्तकरीन्द्रहरिम् ।
हरिणीगणहारकवेणुकलं कलकंठरवोज्वलकंठरणम् ॥७॥
रणखण्डितदुर्जनपुण्यजनं जनमंगलकीर्त्तिलताप्रभवम् ।
भवसागरकुम्भजनामगुणं गुणसंगविवर्जित भक्तगणम् ॥८॥
गणनातिगदिव्यगुणोल्लसितं सितरश्मि सहोदरवक्त्रवरम् ।
वरदृप्त वृषासुर दावघनं घनविभ्रमवेश विहारमयम् ॥९॥
मयपुत्रतमः क्षयपूर्णविधुं विधुरीकृतदानवराजकुलम् ।
... ... कुलनन्दनमत्र नमामि हरिम् ॥१०॥
उरसि परिस्फुरदिन्दिरमिन्दिन्दिरमन्दिरस्रजोल्लसितम् ।
हरिमंगनातिमंगलमंगलसच्चन्दनं वन्दे ॥११॥

इति श्रीमद्रूपगोस्वामिविरचितं
हरिकुसुमस्तवकं ।

॥ श्री श्रीमद्गौरचन्द्रविरचितं प्रेमामृतरसायनस्तोत्रम् ॥

नमो व्रजराजकुमाराय ।
एकदा कृष्णविरहध्यायन्ती प्रियसंगमम् ।
मनोवाष्पनिरासार्थं जल्पतीह मुहुर्मुहुः ॥

गोविन्दो गोकुलोत्सवः ।
कृष्णः कृष्णेन्दुरानन्दो ...
गोपालो गोपगोपेशो वल्लवेन्द्रो व्रजेश्वरः ॥
प्रत्यहं नूतनतरस्तरुणानन्दविग्रहः ।
आनन्दैकसुखस्वामी सन्तोषाक्षयकोषभूः ॥
आभीरिकानवानन्दः परमानन्दकन्दलः ।
वृन्दावनकलानाथो व्रजानन्दनवांकुरः ॥
नयनानन्दकुसुमो व्रजभाग्यफलोदयः ।
अतिनिर्मलसुखदो मोहनो मधुरद्युतिः ॥
सुधानिर्यासनिचयः सुन्दरः श्यामलाकृतिः ।
नवयौवनसम्पन्नः श्याममाधुर्यरसाकरः ॥
इन्द्रनीलमणिस्वच्छो दलिताञ्जनचिक्कणः ।
इन्दीवरसुखस्पर्शो नीरदस्निग्धसुन्दरः ॥
कर्पूरागुरुकस्तूरीकुंकुमाक्तांगधूसरः ।
सुकुञ्चितकचन्यस्तोल्लसच्चारुशिखण्डकः ॥
मत्तालिविलसत्पारिजातपुष्पावतंसकः ।
आननेन्दुजितानन्तपूर्णशारदचन्द्रमाः ॥
श्रीमल्ललाटपाटीरतिलकालकरञ्जितः ।
लोलोन्नतभ्रूविलासो मदालसविलोचनः ॥
आकर्णरक्तसौन्दर्यलहरीदृष्टिमन्थरः ।
घूर्णायमाननयनः साचीक्षणविचक्षणः ॥
अपांगेंगितसौभाग्यतरलीकृतचेतनः ।
ईषन्मुद्रितलोलाक्षः सुनासापुटसुन्दरः ॥
गण्डप्रान्तोल्लसत्स्वर्णमकराकृतिकुण्डलः ।
प्रसन्नानन्दवदनो जगदाह्लादकारकः ॥
सुस्मेरामृतसौन्दर्यप्रकाशीकृतदिङ्मुखः ।
सिन्दुरारुणसुस्निग्धमाणिक्यदशनच्छदः ॥

पीयूषाधिकमाध्वीकसूक्तिश्रुतिरसायनः ।
त्रिभंगललितस्तिर्यग्ग्रीवस्त्रैलोक्यमोहनः ॥
कुञ्चिताधरसंसक्तकूजद्वेणुविनोदकः ।
कंकणांगदकेयूरमुद्रिकादिलसद्भुजः ॥
स्वर्णसूत्रसुविन्यस्तकौस्तुभामुक्तकन्धरः ।
मुक्ताहारोल्लसद्वक्षाः स्फुरच्छ्रीवत्सलाञ्छनः ॥
आपीनहृदयो नीपमालावान् बन्धुरोदरः ।
संवीतपीतवसनो रसनाविलसत्कटिः ॥
अन्तरीणघटीबन्धः प्रमदान्दोलिताञ्चलः ।
अरविन्दपदद्वन्द्वक्वणत्कारितनूपुरः ॥
पल्लवारुणमाधुर्य्यसुकुमारपदाम्बुजः ।
नखचन्द्रजिताशेषदर्पनेन्दुमणिप्रभः ॥
ध्वजवज्राङ्कुशाम्भोजराजच्चरणपल्लवः ।
त्रैलोक्याद्भुतसौन्दर्यपरीपाकमनोहरः ॥
साक्षात्केलिकलामूर्त्तिः परिहासरसार्णवः ।
यमुनोपवनश्रेणीविलासी व्रजनागरः ॥
गोपांगनाङ्गनासक्तो वृन्दारण्यपुरन्दरः ।
आभीरनागरीप्राणनायकः कामशेखरः ॥
यमुनानाविको गोपीपारावारकृतोद्यमः ।
राधावरोधनरतः कदम्बवनमन्दिरः ॥
व्रजयोषित्सदाहृदयो गोपीलोचनतारकः ।
जीवनानन्दरसिकः पूर्णानन्दकुतूहलः ॥
गोपीकाकुचकस्तूरीपंकिलकेलिलालसः ।
अलक्षितकुटीरस्थो राधासर्वस्वसम्पुटः ।
वल्लवीवदनाम्भोजमधुमत्तमधुव्रतः ।
निगूढरसवैदग्ध्यचित्ताह्लादकलानिधिः ॥

कालिन्दीपुलिनानन्दी क्रीड़ाताण्डवपण्डितः ।
आभीरिकाजनानंगरंगभूमिसुधाकरः ॥
विदग्धगोपवनिताचित्ताकूतविनोदकः ।
नवोपायनपाणिस्थगोपनारीगणावृतः ॥
वाञ्छाकल्पतरुः कामकलारसशिरोमणिः ।
कोटिकन्दर्पलावण्यः कोटीन्दुजलितद्युतिः ।
जगत्त्रयमनोमोहकरो मन्मथमन्मथः ।
गोपसीमन्तिनीशश्वद्भावापेक्षापरायणः ॥
नवीनमधुरस्नेह प्रेयसी प्रेम सञ्चयः ।
गोपीमनोरथाक्रान्तनाट्यलीलाविशारदः ॥
प्रत्यंगरभसावेशः प्रमदाप्राणवल्लभः ।
रासोल्लास मदोन्मत्तो राधिकारतिलम्पटः ॥
हेलालीलारतिश्रान्तिस्वेदांकुरचिताननः ।
गोपीकांकालसः श्रीमान्मलयानिलसेवितः ॥
इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेच्छ्रावयेद्वापि स प्रेम्नि प्रमिलेद्ध्रुवम् ॥
इति श्रीमद्गौरचन्द्रविरचितं प्रेमामृतरसायनं स्तोत्रम् ।

श्रीमुकुन्दमुक्तावली

नवजलधरवर्णं चम्पकोद्भासिकर्णम्
विकसितनलिनास्यं विस्फुरन्मन्दहास्यम् ।
कनकरुचिदुकूलं चारुवर्हावचूलं
कमपि निखिलसारं नौमि गोपीकुमारम् ॥१॥
मुखजितशरदिन्दुः केलिलावण्यसिन्धुः
करविनिहितकन्दुर्वल्लवीप्राणबन्धुः ।

वपुरपसृतरेणुः कक्षनिःक्षिप्तवेणु
र्वचनवशगधेनुः पातु मां नन्दसूनुः ॥ २ ॥
ध्वस्तदुष्टशंखचूड वल्लवीकुलोपगूढ़
भक्तमानसाधिरूढ़ नीलकंठपिच्छचूड ।
कंठलम्बिमञ्जुगुञ्ज केलिलब्धरम्यकुञ्ज
कर्णवर्तिफुल्लकुन्द पाहि देव मां मुकुन्द ॥ ३ ॥
यज्ञभङ्गरुष्टशक्रनुन्नघोरमेघचक्र
वृष्टिपूरखिन्नगोपवीक्षणोपजातकोप ! ।
क्षिप्तसव्यहस्तपद्मधारितोच्चशैलसद्म
गुप्तगोष्ठ रक्ष रक्ष मां तथाद्य पङ्कजाक्ष ॥ ४ ॥
मुक्ताहारं दधदुडुचक्राकारं सारं गोपीमनसि मनोजारोपि ।
कोपी कंसे खलनिकुरम्बोत्तंसे वंशे रंगी दिशतु रतिं नः शार्ङ्गी ॥
नीलोद्दामा जलधरमालाश्यामा क्षामाः कामादभिरचयन्तीरामाः
सा मामव्यादखिलमुनीनां स्तव्यागव्यापूर्तिः प्रभुरघशत्रोर्मूर्तिः॥
पर्ववर्तुल शर्वरीपतिगर्वरीतिहराननं
नन्दनन्दनमिन्दिराकृतवन्दनं धृतचन्दनम् ।
सुन्दरीरतिमन्दिरीकृतकन्दरं धृतमन्दरं
कुण्डलद्युतिमण्डलप्लुतकंधरं भज सुन्दरम् ॥ ७ ॥
गोकुलांगनमंगलं कृतपूतना भवमोचनं
कुन्दसुन्दरदन्तमम्बुजवृन्दवन्दितलोचनम् ।
सौरभाकरफुल्लपुष्करविस्फुरत्करपल्लवं
दैवत व्रज दुर्लभं भज वल्लवीकुलवल्लभम् ॥ ८ ॥
तुण्डकान्तिदण्डितोरुपाण्डुरांशुमण्डलं
गण्डपालिताण्डवालिशालिरत्नकुण्डलम् ।
फुल्लपुण्डरीकखण्डक्लृप्तमाल्यमण्डनं
चण्डबाहुदण्डमत्र नौमि कंसखण्डनम् ॥ ९ ॥

उत्तरङ्गदङ्गरागसंगमातिपिङ्गल
स्तुङ्गशृंगसङ्गिपाणिरङ्गनातिमंगलः ।
दिग्विलासमल्लिहासिकीर्त्तिवल्लिपल्लव
स्त्वां स पातु फुल्लचारुचिल्लिरद्य बल्लवः ॥१८॥
इन्द्रनिवारं व्रजपतिवारं निर्धुतवारं हृतघनवारम् ।
रक्षितगोत्रं प्रीणितगोत्रं त्वां धृतगोत्रं नौमि सगोत्रम् ॥११॥
कंसमहीपतिहृततशूलं सन्तत सेवितयामुनकूलम् ।
वन्दे सुन्दर चन्द्रकचूलं त्वामहमखिलचराचरमूलम् ॥१२॥
मलयजरुचिरस्तनुजितमुदिरः पालितविवुधस्तोषितवसुधः ।
मामतिरसिकः केलिभिरधिकः सितसुभगरदः कृपयतु वरदः ॥
उररीकृतमुरलीरुतभङ्गं नवजलधरकिरणोल्लसदङ्गम् ।
युवतिहृदयधृतमदनतरङ्गं प्रणमत यामुनतटकुतरङ्गम् ॥
नवाम्भोदनीलं जगत्तोषिशीलं मुखासंगिवंशं शिखण्डावतंसम्
करालम्बिवेत्रं वराम्भोजनेत्रं धृतस्फीतगुञ्जं भजे लब्धकुंजम्॥
हृतक्षोणिभारं कृतक्लेशहारं जगद्गीतसारं महारत्नहारम् ।
मृदुश्यामकेशं लसद्वन्यवेशं कृपाभिनिदेशं भजे वल्लवेशम् ॥
उल्लसद्वल्लवीवाससां तस्करस्तेजसा निर्जितप्रस्फुरद्भास्करः ।
पीनदोः स्तम्भभोरुल्लसच्चन्दनः पातुवः सर्वतो देवकीनन्दनः ॥
संसृतेस्तारकं तं गवां चारकं वेणुना मण्डितं क्रीड़ने पण्डितं ।
धातुभिर्वेषिणं दानवद्वेषिणं चिन्तय स्वामिनं वल्लवीकामिनम् ॥१८
उपात्तकवलं परागशवलं मदेकशरणं सरोजचरणं ।
अरिष्टदलनं विकृष्टललनं नमामि समहं सदैव तमहम् ॥
विहारसदनं मनोज्ञरदनं प्रणीतमदनं शशांकबदनम् ।
उरस्थ कमलं यशोभिरमलं करात्तकमलं भजस्व तमलम् ॥२०॥
दुष्टध्वांसः कर्णिकारवतंसः खेलद्वंशीपञ्चमध्वानशंसी ।
गोपीचेतः केलिभङ्गीनिकेतः पातु स्वैरी हन्त वः कंसवैरी ॥

वृन्दाटव्यां केलिमानन्दनव्यां कुर्व्वंन्नारीचित्तकन्दर्पधारी ।
नर्म्मोद्गारी मां दकूलापहारी नीपारूढ़ः पातु वर्हावचूडः ॥२२
रुचिरनखे रचय सखे वलितरतिं भजनततिम् ।
त्वमविरतिस्त्वरितगतिर्नतशरणे हरिचरणे ॥२३॥
रुचिरपटः पुलिननटः पशुपपतिगुणवसतिः ।
स मम शुचिर्जलदरुचिर्मनसि परिस्फुरतु हरिः ॥२४॥
केलिविहितयमलार्जुनभञ्जन
सुललितचरितनिखिलजनरञ्जन ।
लोचननर्त्तकजितचलखञ्जन
मां परिपालय कालियगञ्जन ! ॥२५॥
भुवनविसृत्वरमहिमाडम्बर
विरचित निखिल खलोत्करसम्वर ।
वितर यशोदातनय वरं वर
मभिलषितं मे धृतपीताम्बर ॥२६॥
चिकुरकरम्बित चारुशिखण्डं
भालविनिर्जित वरशशिखण्डम् ।
रदरुचिनिर्धुतमुद्रितकुन्दं
कुरुत बुधा हृदि सपदि मुकुन्दम् ॥२७॥
यः परिरक्षितसुरभीलक्षस्तदपि च सुरभीमर्दनदक्षः ।
मुरलीवादनखुरलीशाली स दिशतु कुशलं तव वनमाली ॥
रमितनिखिलडिम्भे वेणुपीतोष्ठविम्बे
हतखलनिकुरम्बे वल्लवीदत्तचुम्बे ।
भवतु महितनन्दे तत्र वः केलिकन्दे
जगदविरलतुन्दे भक्तिरुर्वी मुकुन्दे ॥२८॥
पशुपयुवतिगोष्ठीचुम्बितश्रीमदोष्ठी
स्मरतरलितदृष्टिर्निर्म्मितानन्दवृष्टिः ।

नवजलधरधामा पातु वः कृष्णनामा
भुवनमधुरवेषा मालिनी मूर्तिरेषा ॥३०॥
इति श्रीमद्रूपगोस्वामिविरचिता
मुकुन्दमुक्तावली समाप्ता

॥ अथ श्रीराधिकाष्टकम् ॥

रसवलितमृगाक्षी मौलिमाणिक्यलक्ष्मीः
प्रमुदितमुरवैरि प्रेमवापीमराली ।
व्रजवरवृषभाणोः पुण्यगीर्व्वाणवल्ली
स्नपयति निजदास्ये राधिका मां कदानु ॥१॥
स्फुरदरुणदुकूलद्योतितोद्यन्नितम्ब
स्थलमभिवरकाञ्ची लास्यमुल्लासयन्ती ।
कुचकलस विलासस्फीतमुक्तासरश्रीः
स्नपयति निजदास्ये राधिका मां कदानु ॥२॥
सरसिजवरगर्भाखर्व्वकान्तिः समुद्यत्
तरुणिमघनसाराश्लिष्टकैशोरसीधुः ।
दरविकशित हासस्यन्दिविम्बाधराग्रा
स्नपयति निजदास्ये राधिका मां कदानु ॥३॥
व्रजकुलमहिलानां प्राणभूताखिलानां
पशुपपतिगृहिण्याः कृष्णवत्प्रेमपात्रम् ।
सुललितललितान्तः स्नेहफुल्लान्तरात्मा
स्नपयति निजदास्ये राधिका मां कदानु ॥४॥
निरवधि सविशाखा शाखियूथ प्रसूनैः
स्रजमिह रचयन्ती वैजयन्तीं वनान्ते ।
अघविजयवरोरः प्रेयसी श्रेयसी सा
स्नपयति निजदास्ये राधिका मां कदानु ॥५॥

प्रकटितनिजवासं स्निग्धवेणुप्रणादै
द्रुतगति हरिमारात् प्राप्य कुञ्जे स्मिताक्षी ।
श्रवणकुहरकण्डूं तन्वती नम्रवक्त्रा
स्नपयति निजदास्ये राधिका मां कदानु ॥ ७ ॥
अमलकमलराजि स्पर्शिवातप्रशीते
निज सरसि निदाघे सायमुल्लासिनीयम् ।
परिजनगणयुक्ता क्रीडयन्ती बकारिं
स्नपयति निजदास्ये राधिका मां कदानु ॥ ८ ॥
अति चटुलतरं तं काननान्तर्म्मिलन्तं
व्रजनृपतिकुमारं वीक्ष्य शङ्काकुलाक्षी,
मधुर मृदुवचोभिः संस्तुता नेत्रभंग्या
स्नपयति निजदास्ये राधिका मां कदानु ॥ ६ ॥
पठति विमलचेता मृष्टराधाष्टकं यः
परिहृत निखिलाशासन्ततिः कातरः सन् ।
पशुपपतिकुमारः काममामोदितस्तं
निजजन गणमध्ये राधिकायास्तनोति ॥ ६ ॥
इति श्रीमद्रघुनाथगोस्वामि विरचितं
श्री राधिकाष्टकं सम्पूर्णम् ॥

—[❀]—

॥ श्री राधिकाष्टकम् ॥

कुंकुमाक्त-काञ्चनाब्जगर्व्वहारि गौरभा
पीतनाञ्चिताब्जगन्धकीर्त्तिनिन्दिसौरभा
बल्लवेशसूनु सर्व्व वाञ्छितार्थसाधिका
महात्म पादपद्म दास्यदास्तु राधिका ॥ १ ॥
कौरविन्द कान्ति निन्दि चित्र पट्ट शाटिका
कृष्ण मत्त भृंग केलि फुल्ल पुष्पवाटिका

कृष्णनित्यसंगमार्थ पद्मबन्धुराधिका
महामात्म पादपद्म दास्यदास्तु राधिका ॥ २ ॥
सौकुमार्य्यसृष्टपल्लवालिकीर्त्तिनिग्रहा
चन्द्र चन्दनोत्पलेन्दु सेव्यशीतविग्रहा ।
स्वाभिमर्ष वल्लवीश कामताप बाधिका
महामात्मपादपद्म दास्यदास्तु राधिका ॥ ३ ॥
विश्वबन्ध्य यौवताभिवन्दिताभि या रमा
रूप नव्य यौवनादि सम्पदा न यत्समा ।
शील हार्द लीलया च सा यतोऽस्ति नाधिका
महामात्म पादपद्म दास्यदास्तु राधिका ॥ ४ ॥
रास लास्य गीत नर्म्म सत्कलालिपण्डिता
प्रेमरम्य रूपवेशसद्गुणालिमण्डिता
विश्वनव्यगोप योषिदालितोऽपि याधिका
महामात्म पादपद्म दास्यदास्तु राधिका ॥ ५ ॥
नित्यनव्य रूप केलि कृष्ण भाव सम्पदा
कृष्ण रागबन्ध गोप यौवतेषु कम्पदा ।
कृष्ण रूप वेश केलि लग्न सत्समाधिका
महामात्म पादपद्म दास्यदाऽस्तु राधिका ॥ ६ ॥
स्वेद कम्प कण्टकाश्रु गद्गदादिसञ्चिता
मर्ष हर्ष वामतादि भाव भूषणाञ्चिता ।
कृष्ण नेत्र तोषि रत्न मण्डनालि याधिका
महामात्म पादपद्म दास्यदास्तु राधिका ॥ ७ ॥
या क्षणार्द्धकृष्णविप्रयोगसन्ततोदिता-
नेक दैन्य चापलादि भाववृन्द मोदिता
यत्न लब्ध कृष्ण संग निर्गताखिलाधिका
महामात्म पादपद्म दास्यदास्तु राधिका ॥ ८ ॥

अष्टकेन यस्त्वनेन नौति कृष्णवल्लभां
दर्शनेऽपि शैलजादियोषितालि दुर्लभाम् ।
कृष्णसंगनन्दितात्मदास्यसीधुभाजनं
तत्करोति नन्दितालि सञ्चयाशुभाजनम् ॥ ६ ॥

इति श्री कविराजकृष्णदासगोस्वामि
विरचितं श्रीराधिकाष्टकं
सम्पूर्णम् ॥

श्री चाटुपुष्पाञ्जलिः ॥

नवगोरोचनागौरीं प्रवरेन्दीवराम्बरां ।
मणिस्तवकविद्योति वेणीव्यालांगनाफणाम् ॥ १ ॥
उपमान घटामानप्रहारिमुखमण्डलां ।
नवेन्दुनिन्दिभालोद्यत्कस्तुरीतिलकश्रियम् ॥ २ ॥
भ्रूजितानङ्गकोदण्डां लोलनीलालकावलिं ।
कज्ज्वलोज्ज्वलताराजच्चकोरीचारुलोचनाम् ॥ ३ ॥
तिलपुष्पाभनासाग्रविराजद्वरमौक्तिकां ।
अधरोद्धूतबन्धूकां कुन्दालीबन्धुरद्विजाम् ॥ ४ ॥
सरत्नस्वर्णराजीवकर्णिकाकृतकर्णिकां ।
कस्तूरीबिन्दुचिबुकां रत्नग्रैवेयकोज्ज्वलाम् ॥ ५ ॥
दिव्यांगदपरिष्वंगलसद्भुजमृणालिकां ।
वलारिरत्नवलय कलालम्बकलाबिकाम् ॥ ६ ॥
रत्नांगुरीयकोल्लासि वरांगुलीकराम्बुजां ।
मनोहरमहाहार विहारि कुचकुड्मलाम् ॥ ७ ॥
रोमालिभुजगीमूर्द्धरत्नाभतरलाञ्चितां ।
वलित्रयीलतावद्ध क्षीणभंगुरमध्यमाम् ॥ ८ ॥

मणिसारसनाधार विस्फारश्रोणिरोधसं ।
मणिसारसनाधार विस्फारश्रोणिरोधसं ।

हेमरम्भामदारम्भस्तम्भनोरुयुगाकृतिम् ॥ ९ ॥

जानुद्युतिजितक्षुल्लपीतरत्नसमुद्गकां ।
शरच्छ्रीरजनीराज्य मञ्जीरविरणत्पदाम् ॥१०॥

राकेन्दु कोटि सौन्दर्य्य जैत्रपादनखद्युतिं ।
अष्टाभिः सात्विकैर्भावैराकुलीकृतविग्रहाम् ॥११॥

मुकुन्दाङ्गकृतापाङ्गामनङ्गोर्म्मितरङ्गितां ।
त्वामारब्धप्रियानन्दां वन्दे वृन्दावनेश्वरि ! ॥१२॥

अयि प्रोद्यन्महाभावमाधुरीविह्वलान्तरे !
अशेषनायिकावस्था प्राकट्याद्भुतचेष्टिते ! ॥१३॥

सर्व्वमाधुर्य्यविञ्छोली निर्म्मञ्छितपदाम्बुजे !
इन्दिरामृग्यसौन्दर्य्य स्फुरदंघ्रिनखाञ्चले ! ॥१४॥

गोकुलेन्दुमुखीवृन्दसीमन्तोत्तंसमञ्जरि ! ।
ललितादिसखीयूथ जीवातुस्मितकोरके ! ॥१५॥

चटुलापांगमाधुर्य्य बिन्दून्मादितमाधवे ! ।
तातपाद यशः स्तोम कैरवानन्दचन्द्रिके ! ॥१६॥

अपारकरुणापूर पूरितान्तर्मनोह्रदे ! ।
प्रसीदास्मिन् जने देवि ! निजदास्यस्पृहाजुषि ॥

कच्चित् त्वं चाटुपटुना तेन गोष्ठेन्द्रसूनुना ।
प्रार्थ्यमान चलापांग प्रसादाद्द्रक्ष्यसे मया ॥१८॥

त्वां साधुमाधवीपुष्पैर्माधवेन कलाविदा ।
प्रसाध्यमानां स्विद्यन्तीं वीजयिष्याम्यहं कदा ॥१९॥

केलिविस्रंसिनो वक्रकेशबृन्दस्य सुन्दरि !
संस्काराय कदा देवि ! जनमेतं निदेक्ष्यसि ॥२०॥

कदा बिम्बोष्ठि ! ताम्बूलं मया तव मुखाम्बुजे ।
अर्प्यमानं व्रजाधीशसूनुराच्छिद्य भोक्ष्यते ॥२१॥

व्रजराजकुमारवल्लभाकुलसीमन्तमणि ! प्रसीद मे ।
परिवारगणस्य ते यथा पदवी मे न दवीयसी भवेत ॥२२॥

करुणां मुहुरर्थये परां तव वृन्दावनचक्रवर्त्तिनि !
अपि केशिरिपोर्यया भवेत्स चाटुप्रार्थनभाजनं जनः ॥२३॥

इमं वृन्दावनेश्वर्य्याः जनो यः पठति स्तवं ।
चाटु पुष्पाञ्जलि नाम स स्यादस्याः कृपास्पदम् ॥२४॥

इति श्रीमद्रूपगोस्वामिविरचितः
चाटुपुष्पाञ्जलिः समाप्तः ॥

श्री राधास्तोत्रम्

किं तत् गुह्यतरं ब्रह्मन् यं चिन्त्यमखिलेश्वरैः ।
तन्मे ब्रूहि सुतत्त्वज्ञ योगेशमपि वत्सल ॥

श्रीब्रह्मोवाच ।

शृणु गुह्यतमं तात नारायणमुखाच्छ्रुतम् ।
सर्वदा पूजिता देवी राधा वृन्दावने वने ॥

राधा विश्लेषतः कृष्णो ह्येकदा प्रेमविह्वलः ।
राधामन्त्रं जपन् ध्यायन् राधां सर्व्वत्र पश्यति ॥

ओं अस्य श्रीराधास्तोत्रमन्त्रस्य ब्रह्मा ऋषि रनुष्टुप् छन्दः श्रीराधा देवता क्लीं वीजं ह्रीं शक्तिः श्रीराधाप्रीत्यर्थे जपे विनियोगः ॥

गृहे राधा वने राधा पृष्ठे राधा पुरः स्थिता ।
यत्र तत्र स्थिता राधा राधैवाराध्यते मया ॥

जिह्वा राधा श्रुतौ राधा नेत्रे राधा हृदि स्थिता ।
सर्व्वांगव्यापिनी राधा राधैवाराध्यते मया ॥

पूजा राधा जपे राधा राधिका भोजने गतौ ।
रात्रौ राधा दिवा राधा राधैवाराध्यते मया ॥

माधुर्य्ये मधुरा राधा महत्वे राधिका गुरुः ।
सौन्दर्य्ये सुन्दरी राधा राधैवाराध्यते मया ॥
राधारससुधासिन्धु राधा सौभाग्यमञ्जरी ।
राधा व्रजांगनामुख्या राधैवाराध्यते मया ॥
राधा पद्मानना पद्मा पद्मोद्भवसमुद्भवा ।
पद्मविस्वार्चिता मुख्या राधैवाराध्यते मया ॥
राधा कृष्णात्मिका नित्यं कृष्णो राधात्मिको ध्रुवम् ।
वृन्दावनेश्वरी राधा राधैवाराध्यते मया ॥
जिह्वाग्रे राधिकानाम नेत्राग्रे राधिकातनुः ।
कर्णाग्रे राधिकाकीर्त्तिर्मनोग्रे राधिकामनुः ॥
कृष्णेन सुपीतं स्तोत्रं श्री राधाप्रीतये परम् ।
यः पठेत् प्रयतो नित्यं राधाकृष्णप्रियो भवेत् ॥

इति श्री ब्र० पु० राधास्तोत्रं सम्पूर्णम् ॥

श्री राधिकायाः
प्रेमाम्भोजमरन्दाख्यस्तवराजः ॥

महाभावोज्वलचिन्ता रत्नोद्भावितविग्रहां ।
सखीप्रणयसद्गन्धवरोद्वर्त्तन सुप्रभाम् ॥ १ ॥
कारुण्यामृतवीचिभिस्तारुण्यामृतधारया ।
लावण्यामृतवन्याभिः स्नपितां ग्लपितेन्दिराम् ॥ २ ॥
ह्री पट्टवस्त्रगुप्तांगीं सौन्दर्य्यघुसृणाञ्चितां ।
श्यामलोज्वलकस्तूरी विचित्रितकलेवराम् ॥ ३ ॥
कम्पाश्रु पुलकस्तम्भ स्वेद गद्गदरक्तता ।
उन्मादो जाड्यमित्येतै रत्नैर्नवभिरुत्तमैः ॥ ४ ॥
क्लृप्तालंकृतिसंश्लिष्टां गुणालीं पुष्पमालिनीम् ।
धीराधीरात्व सद्वासपटवासैः परिष्कृताम् ॥ ५ ॥

प्रच्छन्नमानधम्मिल्लां सौभाग्यतिलकोज्वलां ।
कृष्णनाम यशः श्रावावतंसोल्लासिकर्णिकाम् ॥ ६ ॥
रागताम्बूलरक्तोष्ठीं प्रेमकौटिल्यकज्जलां ।
नर्म्मभाषितनिःस्यन्दस्मितकर्पूरवासिताम् ॥ ७ ॥
सौरभान्तः पुरे गर्व्वपर्य्यंकोपरि लीलया ।
निविष्टं प्रेमवैचित्त्य विचलत्तरलाञ्चिताम् ॥ ८ ॥
प्रणयक्रोधसच्चोलीबन्धगुप्तीकृतस्तनां ।
सपत्नी-वक्त्र हृच्छोषि यशः श्रीकच्छपीवराम् ॥ ९ ॥
मध्यतान्मसखीस्कन्ध लीलान्यस्तकराम्बुजां ।
श्यामां श्याम स्मरामोदमधूली परिवेशिकाम् ॥१०॥
त्वां नत्वा याचते धृत्वा तृणं दन्तैरयं जनः ।
स्वदास्यामृतसेकेन जीवयामूं सुदुःखितम् ॥
न मुञ्चेच्छरणायातमपि दुष्टं दयामयः ।
अतो गान्धर्व्विके ! हाहा मुञ्चैनं नैव तादृशम् ॥१२॥
प्रेमाम्भोजमरन्दाख्यं स्तवराजमिमं जनः ।
श्री राधिका कृपाहेतुं पठंस्तद्दास्यमाप्नुयात् ॥१३॥

इति श्रीमद्रघुनाथगोस्वामि विरचितःश्रीराधिकायाः
प्रेमाम्भोजमरन्दाख्य स्तवराजः
समाप्तः

अथ प्रेमाम्भोजमरन्दाख्यस्तवराजस्य भाषा

महाभाव सोई जु है चिंतामणि गणराज ।
पूरण ईछा कृष्ण की करैं यही जिहि काज ॥
महाभाव चिन्तामणि सु राधाको जु स्वरूप ।
ललितादिक सहचरी तिहि कायव्यूह जु रूप ॥

कृष्ण नेह राधाजु प्रति उबटन अंग सुवास।
प्रति सुगन्ध तातें जु वपु-उज्वल किरण प्रकास॥
कारुण्यामृत धार कौं स्नान प्रथम किय आहि।
तारुण्यामृत नदी कौ स्नान द्वितीय निज ताहि॥
लावण्यामृत पूर मधि ताऊ पर सुस्नान।
निज लज्या स्यामहि करण पट सारी परिधान॥
औ अनुराग जु कृष्ण कौ अरुण वसन विवि सोइ।
प्रणयमान उर कंचुकी आछादन है जोइ॥
सौन्दर्य्य सुकुकुंम सखी प्रणय सु चन्दन आहि।
स्मित शोभा व कर्पूर त्रय अंग विलेपन ताहि॥
उज्वलरस श्रीकृष्ण कौ मृगमद भर है सोय।
सवै विचित्रित अंग तिहि तिही सु मृगमद होय॥
वाम्य मान प्रच्छन्न है केशपास विन्यास।
धीराधीरात्महि जु गुण वहै अंग पटवास॥
रागहि वीरा रंग करि अधर मधुर अति लाल।
प्रेम कुटिलता नेत्र युग अंजन परम रसाल॥
सुदीप्त सात्विक भाव हर्षादि संचारी येई

सब भाव अंग सवै भूषण उजास है

किलकिंचितादि भाव विंशति भूषित सदा

गुण गण फूल माला अंगनि प्रकास है।

अलक तिलक चारु उज्वल सौभाग्य प्रेम

वैचित्य रत्न तरल हिये छविरास है

मध्यावय र्थित सोई सखी स्कन्ध करन्यास

कृष्णलीला मनोवृत्ति आली आस पास है

सौरभ निवास निज अंगनि सौभाग्य गर्व

पलका विराजि सदा चाहै कृष्ण संग है

कृष्ण नाम गुण जस तेई श्रवणावतंस

कृष्ण नाम गुण यश वचन तरंग है।

कृष्ण कौ करावै स्याम रस मधु पान सदा

पूर्ण करै कृष्ण के जु सवै काम रंग है

कृष्ण कौ विशुद्ध प्रेम रतन तिहिं आकार

है अनुप गुण गण पूर्ण सब अंग है॥

इति श्रीसुवलश्याम विरचिता चैतन्यचरितामृते स्थिता
प्रेमाम्भोजमरन्दाख्यस्तवराजस्य भाषा

युगलपरिहारस्तोत्रम्

हे सौन्दर्य्य निदान रूपगरिमन् माधुर्य्यलीलानट?
हे आश्चर्य्यविशेषवेशधरहे हे वंशिभूषविभो!
हे वृन्दाटवीभूविलासिनि! लसत्केलिकलाकौमुदी
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर॥१॥
हे हे कृष्ण व्रजेन्द्रनन्दनविभो हे राधिके श्रीमति!
हे श्रीमल्ललितादिसख्यसुखिते! हे श्यामलाप्रेमदे!
हे लीलाकलनात्तलालसलसद् भंगीत्रय प्रेयसि
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर॥२॥
हे पीताम्बरशोभनाब्जकर हे हे नीलचित्राम्बरे!
हे वंशीवटकेलिकौतुकपटो हे कुञ्जगेहेश्वरि!
हे श्रीरासविलास लम्पट गुरो! हे सुन्दरि प्रीतिदे!
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हरं॥३॥
हे जाम्बुनदनिन्दिसुन्दरतनो हे हे घनश्यामल?
हे हे पंकजपत्रनेत्रयुगले हे खञ्जनी लोचन।
हे चूड़ावेणिवद्धचामरकचे हे हारिणि स्वामिनि!
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर॥४॥

हे हे शारदपूर्णचन्द्रवदने हे हे सुरम्यानन ।
हे हे शारदपूर्णचन्द्रवदने ! हे चित्रलेखाञ्चिते ।
हे श्रीवत्सांकितचारुचित्रहृदये ! हे चित्रलेखाञ्चिते ।
हे बिम्बाधरचारुचित्रचिबुके ! भ्रूभंगरम्यालिके
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर ॥ ५ ॥
हे हे भानुसुतायशोमतिसुतौ रामानुजश्यामल !
हे नाथ व्रजचन्द्रगोकुलपते हे नागरीनागर !
हे सर्व्वस्व विलासिनीरतिपरे हे केशवामोदिनि !
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर ॥ ६ ॥
हे गान्धर्व्वे नटवरवपु र्मन्मथानन्दसिन्धो
हे वैदग्धाधिकमधुरिमाधार हे प्राणनाथ !
हे रामा परमे परात्परपरारम्भे सदोल्लासिनि !
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर ॥ ७ ॥
कारुण्यामृतचन्द्र सुन्दरवधुलावण्यलीलानट
हे गोपीगणनाथ गोत्रधर हे गोविन्द गोपाल हे !
हे गौरीगुरु गौरवाखिलगुरो गोपांगनावेष्टिते
हे राधे चरणे विधेहि शरणं हे कृष्ण तृष्णां हर ॥ ८ ॥
हे हे कृपालुचरित व्रजकल्पवृक्ष !
कारुण्यलेशकृत कातरलोकरक्ष ॥
हे कृष्ण हे रमण हे भुवनैकनाथ
हा हा कदातिकरुणा भवतोर्भवेन्मे ॥
इति श्रीमन्महाप्रभु मुखोद्गीर्ण
श्रीयुगलपरिहारस्तोत्रम् ॥

श्री वृन्दावनाष्टकम्

मुकुन्दमुरलीरव श्रवणफुल्लहृद्वल्लरी
कदम्बककरम्बित प्रतिकदम्बकुञ्जान्तरा ।

कलिन्दगिरिनन्दिनी कमल कन्दलान्दोलिना
सुगन्धिरनिलेन मे शरणमस्तु वृन्दाटवी ॥ १ ॥
विकुंठपुर संश्रयाद्विपिनतोऽपि निःश्रेयसा
त्सहस्रगुणितां श्रियं प्रदुहती रसश्रेयसीम् ।
चतुर्मुखमुखैरपि स्पृहिततार्णदेहोद्भवा
जगद्गुरुभिरग्रिमैः शरणमस्तु वृन्दाटवी ॥ २ ॥
अनारत विकस्वरव्रतति पुञ्ज पुष्पावली
विसारिवर सौरभोद्गमरमाचमत्कारिणी ।
अमन्दमकरन्दभृद्विटपिवृन्दवन्दीकृत
द्विरेफकुलवन्दिता शरणमस्तु वृन्दाटवी ॥ ३ ॥
क्षणद्युतिघनश्रियोर्व्रजनवीनयूनोः पदैः
सुवल्गुभिरलंकृता ललितलक्ष्मलक्ष्मीभरैः ।
तयोर्नखरमण्डली शिखरकेलिचर्य्योचिते
र्वृता किशलयांकुरैः शरणमस्तु वृन्दाटवी ॥ ४ ॥
व्रजेन्द्र सखनन्दिनीशुभतराधिकारक्रिया
प्रभावजसुखोत्सव स्फुरितजङ्गम स्थावरा ।
प्रलम्बदमनानुज ध्वनितवंशिकाकाकली
रसज्ञमृगमण्डला शरणमस्तु वृन्दाटवी ॥ ५ ॥
अमन्दमुदिराव्वुर्दाभ्यधिक माधुरी मेदुर
व्रजेन्द्रसुतवीक्षणोन्नटितनीलकण्ठोत्करा ।
दिनेशसुहृदात्मजाकृतनिजाभिमानोल्लस
ल्लताखग.मृगांगना शरणमस्तु वृन्दाटवी ॥ ६ ॥
अगण्य गुननागरी गणगरिष्ठ गान्धर्व्विका
मनोजरणचातुरीपिशुनकुंजपुञ्जोज्वला ।
जगत्रयकलागुरो र्ललितलास्य वल्गत्पद
प्रयोगविधि साक्षिणी शरणमस्तु वृन्दाटवी ॥ ७ ॥

वरिष्ठ हरिदासता पदसमृद्धगोवर्द्धना
मधूद्वह वधूचमत्कृतिनिवासरासस्थला ।
अगूढ़गहनश्रियो मधुरिमव्रजेनोज्वला
व्रजस्य सहजेन मे शरणमस्तु वृन्दाटवी ॥ ८ ॥
इदं निखिलनिष्कुटावलिवरिष्ठवृन्दाटवी
गुणस्मरणकारि यः पठति सुष्ठु पद्याष्टकं ।
वसन्व्यसनमुक्तधीरनिशमत्र सद्वासनः
स पीतवसने वशी रतिमवाप्य विक्रीड़ति ॥ ९ ॥
इति श्रीमद्रूपगोस्वामिभिर्विरचितं
श्री वृन्दावनाष्टकं सम्पूर्णम् ॥

श्री यमुनाष्टकम् ॥

भ्रातुरन्तकस्य पत्तनेऽभिपत्तिहारिणी
प्रेक्षयाति पापिनोऽपि पापसिन्धुतारिणी ।
नीरमाधुरीभिरप्यशेषचित्तवन्दिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ १ ॥
हारिवारिधारयाभिमण्डितोरुखाण्डवा
पुण्डरीकमण्डलोद्यदण्डजालिताण्डवा ।
स्नानकामपामरोग्रपापसम्पदन्धिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ २ ॥
शीकराभिमृष्टजन्तुदुर्विपाकमर्द्दिनी
नन्दनन्दनान्तरङ्गभक्तिपूरवर्द्धिनी ।
तीरसंगमाभिलाषिमङ्गलानुबन्धिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ३ ॥
द्वीपचक्रवाकजुष्टसप्तसिन्धुभेदिनी
श्रीमुकुन्दनिर्म्मितोरुदिव्यकेलिवेदिनी ।

कान्तिकन्दलीभिरिन्द्रनीलवृन्दनिन्दिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ४ ॥
माथुरेण मण्डलेन चारुणाभिमण्डिता
प्रेमनद्धवैष्णवाध्ववर्द्धनाय पण्डिता ।
ऊर्म्मिदोर्विलासपद्मनाभपादवन्दिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ५ ॥
रम्यतीररम्भमाणगोकदम्बभूषिता
दिव्यगन्धभाक्कदम्बपुष्पराजिरूषिता ।
नन्दसूनुभक्तसंघ संगमाभिनन्दिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ६ ॥
फुल्लपक्षमल्लिकाक्षहंसलक्षकूजिता
भक्तिविद्धदेवसिद्ध किन्नरालिपूजिता ।
तीरगन्धवाहगन्ध जन्मबन्धरन्धिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ७ ॥
चिद्विलासवारिपूर भूर्भुवः स्वरापिणी
कीर्त्तितापि दुर्म्मदोरुपापमर्म्मतापिनी ।
वल्लवेन्द्रनन्दनांगरागभङ्गगन्धिनी
मां पुनातु सर्वदारविन्दबन्धुनन्दिनी ॥ ८ ॥
तुष्टबुद्धिरष्टकेन निर्म्मलोरुचेष्टितां
त्वामनेन भानुपुत्रि ! सर्वदेववेष्टितां ।
यः स्तवीति वर्द्धयस्व सर्व्वपापमोचने
भक्तिपूरमस्य देवि ! पुण्डरीकलोचने ॥ ९ ॥
इति श्रीमद्रूपगोस्वामिविरचितं
यमुनाष्टकं सम्पूर्णम् ॥

श्री श्रीगोवर्द्धनवासप्रार्थनादशकम्

निजपतिभुजदण्डच्छत्रभावं प्रपद्य
प्रतिहतमदधृष्टोद्दण्डदेवेन्द्रगर्व्व !।
अतुलपृथुलशैलश्रेणिभूप प्रियं मे
निजनिकटनिवासं देहि गोवर्द्धन त्वम् ॥ १ ॥

प्रमदमदनलीलाः कन्दरे कन्दरे ते
रचयति नवयूनोर्द्वन्द्वमस्मिन्नमन्दं ।
इति किल कलनार्थं लग्नकस्तत् द्वयोर्मे
निर्जनिकटनिवासं देहि गोवर्द्धन त्वम् ॥ २ ॥

अनुपममणिवेदी रत्नसिंहासनोर्व्वी
रुहझरदरसानुद्रोणि संघेषु रङ्गैः ।
सहबलसखिभिः संखेलयन् स्वप्रियं मे
निजनिकटनिवासं देहि गोवर्द्धन त्वम् ॥ ३ ॥

रसनिधिनवयूनोः साक्षिणी दानकेले
र्द्युति परिमलविद्धां श्यामवेदीं प्रकाश्य ।
रसिकवरकुलानां मोदमास्फालयन्मे
निजनिकटनिवासं देहि गोवर्द्धन त्वम् ॥ ४ ॥

स्थलजलतलशस्यै भूरुहच्छायया च
प्रदिपदमनुकालं हन्त संवर्द्धयन् गाः ।
त्रिजगति निजगोत्रं सार्थकं ख्यापयन्मे
निजनिकटनिवासं देहि गोवर्द्धन त्वम् ॥ ५ ॥

सुरपतिकृतदीर्घद्रोहतो गोष्ठरक्षां
तव नव गृहरूपस्यान्तरे कुर्व्वतैव ।
अघ-बकरिपुणोच्चैः दत्तमान द्रुतं मे
निर्जनकट निवासं देहि गोवर्द्धन त्वम् ॥ ७ ॥

हरिदयितमपूर्व्वं राधिकाकुण्डमात्म
प्रियसखमिह कण्ठे नर्म्मणालिंग्य गुप्तः ।
नवयुवयुगखेलास्तत्र पश्यन्रहो मे
निर्जनिकट निवासं देहि गोवर्द्धन त्वम् ॥७॥

गिरिनृप हरिदास श्रेणी वर्य्येति नामा-
मृतमिदमुदितं श्रीराधिकावक्त्रचन्द्रात् ।
व्रजनवतिलकत्वे कॢप्तवेदैः स्फुटं मे
निर्जनिकटनिवास देहि गोवर्द्धन त्वम् ॥८॥

निजजनयुत राधाकृष्णमैत्रीरसाक्त
व्रजनरपशुपक्षि व्रातसौख्यैकदातः ।
अगणित करुणत्वान्माधुरी कृत्यतान्तं
निजनिकट निवासं देहि गोवर्द्धन त्वम् ॥६॥

निरुपधिकरुणेन श्रीशचीनन्दनेन
त्वयि कपटिशठोऽपि त्वत्प्रियेणार्पितोऽस्मि ।
इति खलु मम योग्यायोग्यतां तामगृन्हन्
निज्जनिकट निवासं देहि गोवर्द्धन त्वम् ॥१०॥

रसददशकमस्य श्रीलगोवर्द्धनस्य
क्षितिधरकुलभर्त्तुर्यः प्रयत्नादधीते ।
स सपदि सुखदेऽस्मिन् वासमासाद्य साक्षा
च्छुभदयुगलसेवारत्नमाप्नोति तूर्णम् ॥११॥

इति श्रीमद्रघुनाथगोस्वामिविरचितं
श्रीगोवर्द्धनवासप्रार्थनादशकम

श्रीराधाकुण्डाष्टकम् ॥

वृषभदनुजनाशान्नर्म्मधर्म्मोक्तिरंगै
र्निखिलनिजसखीभिर्यत्स्वहस्तेन पूर्णम् ।

प्रकटितमपि वृन्दारण्यराज्ञ्या प्रमोदै
स्तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥१॥
व्रजभुवि मुरशत्रोः प्रेयसीनां निकामैः
रसुलभमपि तूर्णं प्रेम कल्पद्रुमं तम् ।
जनयति हृदि भूमौ स्नातुरुच्चैः प्रियं य
स्तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥२॥
अघरिपुरपि यत्नादत्रदेव्याप्रसाद
प्रकरकृतकटाक्षप्राप्तिकामः प्रकामं ।
अनुसरति यदुच्चैः स्नानमेवानुबन्धै
स्तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥३॥
व्रजभुवनसुधांशोः प्रेमभूमिर्निकामं
व्रजमधुरकिशोरीमौलिरत्नप्रियेव
परिचितमपि नाम्ना यच्च तेनैव तस्या
स्तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥४॥
अपि जन इह कश्चित् यस्य सेवाप्रसादैः
प्रणय सुरलता स्यात्तस्य गोष्ठेन्द्रसूनोः ।
सपदि किल मदीशादास्य पुष्प प्रशस्या
स्तदति सुरभिराधाकुण्डमेवाश्रयो मे ॥५॥
तटमधुरनिकुञ्जाः क्लृप्तनामान उच्चै-
र्निज परिजनवर्गैं संविभज्याश्रितास्तैः ।
मधुकररुतरम्या यस्य राजन्ति काम्या
स्तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥६॥
तटभुवि वर वेद्यां यस्य निर्मातिहृद्यां
मधुरमधुरवार्त्तां गोष्ठचन्द्रस्य भंग्या ।
प्रथयति मिथ ईशा प्राणसख्यालिभिः सा
तदतिसुरभिराधाकुण्डमेवाश्रयो मे ॥७॥

अनुदिनमतिरंगैः प्रेममत्तालिसंघै
र्वररसरसिजगन्धै र्हारि वारि प्रपूर्णे ।
विहरत इह यस्मिन् दम्पती तौ प्रमत्तौ
तदति सुरभिराधाकुण्डमेवाश्रयो मे ॥ ८ ॥
अविकलमतिदेव्याश्चारुकुण्डाष्टकं यः
परिपठति तदीयोल्लासि दास्यार्पितात्मा ।
अचिरमिह शरीरे दर्शयत्येव तस्मै
मधुरिपुरतिमोदैः श्लिष्यमाणां प्रियां ताम् ॥९॥

इति श्रीराधाकुण्डाष्टकम्

श्री उपदेशामृतम्

वाचो वेगं मनसः क्रोधवेगं
जिह्वावेगमुदरोपस्थवेगम् ।
एतान् वेगान् यो विसहेत वीरः
सर्व्वामपीमां पृथिवीं स शिष्यात् ॥ १ ॥
अत्याहारः प्रयासश्च प्रजल्पोऽनियमाग्रहः ।
जनसङ्गश्च लौल्यश्च षड्भिर्भक्तिर्विनश्यति ॥ २ ॥
उत्साहान्निश्चयाद्धैर्यात्तत्तत्कर्म्म प्रवर्त्तनात् ।
संगत्यागात् सतो वृत्तेः षड्भिर्भक्तिः प्रसीदति ॥ ३ ॥
ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुंक्ते भोजयते चैव षड् विधं प्रीतिलक्षणम् ॥ ४ ॥
कृष्णेति यस्य गिरि तं मनसाद्रियेत
दीक्षास्ति चेत् प्रणतिभिश्च भजन्तमीशम् ।
शुश्रूषया भजनविज्ञमनन्यमन्य
निन्दादिशून्यहृदमीप्सितसंगलब्ध्या ॥ ५ ॥

दृष्टैः स्वभावजनितैर्वपुषस्तु दोषै
र्न प्रकृतत्वमिह भक्तजनस्य पश्येत् ।
गङ्गाम्भसां न खलु बुद्बुदफेनपङ्कै
र्ब्रह्मद्रवत्वमपगच्छति नीरधर्म्मैः ॥ ६ ॥
स्यात् कृष्ण नाम चरितादि सिताप्यविद्या
पित्तोपतप्तरसनस्य न रोचिका नु ।
किन्त्वादरादनुदिनं खलु सैव जुष्टा
स्वाद्वी क्रमाद्भवति तद्गदमूलहन्त्री ॥ ७ ॥
तन्नामरूप चरितादिषु कीर्त्तनानु
स्मृत्योः क्रमेण रसना मनसी नियोज्य ।
तिष्ठन्व्रजे तदनुरागिजनानुगामी
कालं नयेन्निखिलमित्युपदेशसारः ॥ ८ ॥
वैकुण्ठाज्जनिता वरा मधुपुरी तत्रापि रासोत्सवाद्
वृन्दारण्यमुदारपाणिरमणात्तत्रापि गोवर्द्धनः ।
राधाकुण्डमिहापि गोकुलपतेः प्रेमामृताप्लावनात्
कुर्य्यादस्य विराजितो गिरितटे सेवां बिवेकी न कः ॥ ९ ॥
कर्म्मिभ्यः परितो हरेः प्रियतमा ख्याति ययुर्ज्ञानिन
स्तेभ्यो ज्ञानविमुक्त भक्तिपरमाः प्रेमैकनिष्ठा यतः ।
तेभ्यस्ताः पशुपालपङ्कजदृशस्ताभ्योऽपि सा राधिका
प्रेष्ठा तद्वदीयं तदीयसरसी तां नाश्रयेत् कः कृती ॥१०॥
कृष्णस्योच्चैः प्रणयवसतिः प्रेयसीभ्योऽपि राधा
कुण्डञ्चास्या मुनिभिरभितस्तादृगेव व्यधायि ।
यत्प्रेष्ठैरप्यलमसुलभं किं पुनर्भक्तिभाजां
प्रेमेदं तत्र सकृदपि सरः स्नातुराविष्करोति ॥११॥
इति श्रीमद्रूपगोस्वामिपादेनोक्तं श्रीउपदेशामृतं ॥

भक्तिलता का वर्णन

भ्रमत भ्रमत ब्रह्माण्ड मधि जीव भाग्य युत कोय ।
भक्तिलता बीजहि लहै गुरु हरि कृपा जु सोय ॥
बोवे ताही बीज कौं ह्वै करि माली जोय ।
श्रवन कीरतन नीर करि सींचे ताही सोय ॥
उपजि लता बाढ़े जगत अंडभेदि सब जाय ।
ब्रह्मलोक विरजा लङ्घि फिरि वैकुण्ठहि जाय ॥
तब तिहि पर गोलोक पुनि वृन्दावन मधि जाइ ।
कृष्ण चरण युग कल्पतरु तिन पर सो लपटाय ॥
फलै प्रेमफल फैलि सो तिंह सुरतरु के तीर ।
ह्यां माली सींचे सदा श्रवण कीरतन नीर ॥
जो हरिजन अपराध पुनि उठे मत्त मातङ्ग ।
खोदि तोरि डारे लतहि सूक जाइ तिहि अंग ॥
यातें माली जतन करि करै बारि चहुँधाहि ।
ज्यौं अपराध मतङ्ग कौ होय उठन ही नाहि ॥
जौ ताकौ अँग और हू उपशाखा उपजाहि ।
मुक्ति भुक्ति की चाह लगि है तिन संख्या नाहि ॥
छल छिद्र जु पापाचरण जीव विहंसनि आहि ।
लाभ प्रतिष्ठादिक जु श्री उपशाखा गण जाहि ॥
सींचे जलकौं पान करि उपसाखा बढ़ि जांहि ।
थकित मूलसाखा जु ह्वै बढ़िवै पावै नांहि ॥
करिये उपसाखा प्रथम छेदन की जु उपाय ।
बढ़ि जु मूल साखा तबै श्रीवृन्दावन जाय ॥
परै प्रेम फल पक्क करि माली स्वादहि ताहि ।
माली लता अवलंब करि पावै सुरतरु आहि ॥

तहां कल्पतरु की करैं सेवन नित प्रति सोय ।
करैं जु सुख सौं प्रेम फल आस्वादन सब जोय ॥
इति श्रीसुबलश्यामविरचितश्रीचैतन्यचरितामृतस्थित
भक्तिलता वर्णन

इति नित्य पाठ के विषय

अथ नित्य स्मरण पद्धतिः

साधक ब्रह्ममुहूर्त्त में उठ कर "गौर गौर" इ
दिक तथा "कृष्ण कृष्ण" इत्यादिक का कीर्त्तन करें ।

गौर गौर गौर गौर गौर गौर गौर हे !
गौर गौर गौर गौर गौर गौर गौर हे !
गौर गौर गौर गौर गौर गौर रक्ष माम् ।
गौर गौर गौर गौर गौर गौर पाहि माम् ॥ १ ॥

कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण हे !
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण हे !
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण पाहि माम् ।
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण रक्ष माम् ॥ २ ॥

अनन्तरं पृथिवीं प्रार्थयेद् यथा—
समुद्रमेखले देवि ! पर्व्वतस्तनमण्डले ।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ ३ ॥

अनन्तर बाहिर जाकर हाथ और पांव धोकर द
करें । पश्चात् रात्रि के पहिरे वस्त्र परित्याग कर शुद्ध
पहिरे और आगे लिखे विधान से आचमन पूर्वक प

थान तथा पवित्र आसन पर पूर्व्वाभिमुख होकर बैठें ।
कर आचमन कर निजाभीष्ट मन्त्र का स्मरण करें ।
दनन्तर अपने मस्तक में श्रीगुरुचरण कमलों का ध्यान
करता हुआ वक्ष्यमान श्लोकों का पाठ करें ।

जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्म्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्द्धयन्कामदेवम् ॥४॥
विदग्धगोपालविलासिनीनां
सम्भोगचिन्हाङ्कितसर्वगात्रम् ।
पवित्रमाम्नायगिरामगम्यं
ब्रह्म प्रपद्ये नवनीत चौरम् ॥

इत्यादिक अपने अपने सम्प्रदाय तथा भावानुयायी श्लोक
समूह का पाठ करें ।

अनन्तर गुरुदेव का स्मरण—
कृपामरन्दान्वितपादपंकजं श्वेताम्बरं गौररुचिं सनातनम् ।
शन्दं सुमाल्याभरणं गुणालयं स्मरामि सद्भक्तिमयं गुरुं हरिम् ॥

अनन्तर गुरुवर्ग का ध्यान करें—
आजानुलम्बितभुजं प्रफुल्लकमलेक्षणम् ।
वराभयं करं शान्तं करुणामृतवारिधिम् ॥
श्रीनामांकितसर्व्वांगं हरिमन्दिरभालकम् ।
प्रसन्नवदनं ध्यायेद् गुरुं सर्व्वार्थसिद्धिदम् ॥

श्रीगुरु प्रणाम

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

श्रीपरमगुरु प्रणाम

पादाब्जमहसा महाकुमतिमोहविध्वंसकम्
व्रजप्रणयसुश्रियं प्रणततापसंहारकम् ।
व्रजेन्द्रतनयप्रियं मधुरमूर्तिमाल्हादकं
नमामि परमं गुरुं भवसमुद्रसन्तारकम् ॥

श्रीपरात्परगुरू प्रणाम

राधा व्रजेन्द्रात्मजभावमूर्त्तये वृन्दावन प्रेम सुखामरद्रुवे।
कारुण्यवारांनिधये महात्मने परात्परस्मै गुरवे नमोऽस्तुते।

परमेष्ठि गुरु प्रणाम

महामहिमवन्दितं सकलसत्वभद्राकरं
व्रजेन्द्र सुतसेवन प्रणयसीधु विश्वम्भरम् ।
कृपामयकलेवरं रसविलासभूषाधरं
नमामि परमेष्ठिनं गुरुमहं सदा शंकरम् ॥

अनन्तर प्रार्थना-

त्रायस्व भो जगन्नाथ ! गुरो ! संसारवन्हिना ।
दग्धं मां कालदष्टंच त्वामहं शरणं गतः ॥
हे श्रीगुरो ! ज्ञानद दीनबन्धो ! स्वानन्ददातः करुणैकसिन्धो !
वृन्दावनासीन ! हितावतार ! प्रसीद राधाप्रणयप्रचार ! ॥

वृन्दावन में श्रीगुरुरूपा सखी ध्यान-

कृपा मरन्द सम्पूर्णां शुद्धस्वर्णा.सद्रुचिम् ।
क्षीणमध्यां पृथुश्रोणीं कस्तूरीतिलकान्विताम् ॥
तुंगस्थनीं विधुमुखीं रत्नाभरणभूषिताम् ।
शोणान्तरीयचित्रेन्दु ज्योत्स्नाम्बरविधारिणीम् ॥
हारन्मणिचितस्वर्णचूड़िकां मधुरस्मिताम् ।
सीमन्तोपरिसद्रत्नामलकालिलसन्मुखीम् ॥

किशोरीं गोपिकां रम्यां राधिकाप्रीतिभूषणाम् ।
सुन्दरीं सुकुमारांगीं गुरुं ध्यायेत्प्रयत्नतः ॥

श्रीगुरुरूपा सखी प्रणाम-

गुरुरूपां सखीं वन्दे प्रेमानन्दकलेवराम् ।
गोपिकां राधिकाश्यामप्रेमदां करुणामयीम् ॥

श्रीगुरुरूपा सखी प्रार्थना-

त्वं गोपिका वृषरवेस्तनयान्तिकेऽसि
सेवाधिकारिणि गुरो ! निजपादपद्मे
दास्यं प्रदाय कुरु मां व्रजकानेन श्री-
राधांघ्रिसेवनरसे सुखिनीं सुखाब्धौ ॥

तन्निकटे नवद्वीपस्थ आत्मध्यान ।-

दिव्य श्रीहरिमन्दिराढ्यमलिकं कण्ठं सुमालान्वितं
वक्षः श्रीहरिनामवर्णसुभगं श्रीखण्डलिप्तं ततः ।
शुभ्रश्लक्ष्णनवाम्बरं विमलतां नित्यं वहन्तीं तनुं
ध्यायेत् श्रीगुरुपादपद्मनिकटे सेवोत्सुकामात्मनः ॥

तन्निकटे व्रजस्थ आत्मध्यान ।-

श्रीगुरोश्चरणाम्भोज कृपासिक्तकलेवराम् ।
किशोरीं गोपवनितां नानालंकारभूषिताम् ॥
पृथु तुंगकुचद्वन्द्वां चतुः षष्ठिकलान्विताम् ।
रक्तचित्रान्तरीयामावृत शुक्लोत्तरीयकाम् ॥
स्वर्णचित्रारुणप्रान्त मुक्तादाम सुकाञ्चलीम् ।
चन्दनागुरुकाश्मीर चर्चितांगीं मधुस्मिताम् ॥
सेवोपायन निर्म्माणकुशलां सेवनोत्सुकाम् ।
विनयादिगुणोपेतां श्रीराधाकरुणार्थिनीम् ।
राधाकृष्णसुखामोदमात्रचेष्टां सुपद्मिनीम् ।
निगूढ़भावां गोविन्दे मदनानन्दमोहिनीम् ॥

नानारस कलालाप शालिनीं दिव्यरूपिणीम् ।
संगीतरस संजात भावोल्लासभरान्विताम् ॥
तप्तकाञ्चन शुद्धाभां स्वसौख्यगन्धवर्जिताम् ।
दिवानिशं मनोमध्ये द्वयोः प्रेमभराकुलाम् ॥
एवमात्मनमनिशं भावयेद् भक्तिमाश्रितः ॥

श्रीनवद्वीप ध्यान–
स्वधुर्न्याश्चारुतीरे स्फुरितमतिवृहत्कूर्म्मपृष्ठाभगात्रं
रम्यारामावृतं सन्मणिकनकमहा सद्मसंघैः परीतम् ।
नित्यं प्रत्यालयोद्यत्प्रणयभरलसत् कृष्णसंकीर्त्तनाढ्यं
श्रीवृन्दाटव्यभिन्नं त्रिजगदनुपमं श्रीनवद्वीपमीड़े ॥

श्रीनवद्वीपयोगपीठध्यान–
ओं सिंहासनस्य मध्ये श्रीगौरकृष्णं स्मरेत्ततः ।
तद्दक्षिणे नित्यानन्दं प्रेमानन्दकलेवरम् ॥
वामे गदाधरं देवमानन्दशक्तिविग्रहम् ।
देवस्याग्रे कर्णिकायामद्वैतं विश्वपावनम् ॥
तद्दक्षिणे भक्तवर्य्यं श्रीवासं छत्रहस्तकम् ।
चतुर्दिक्षु महानन्दमयं भक्तगणं तथा ॥

प्रणाम–
नवीनश्रीभक्तिं नवकनकगौराकृतिपतिं
नवारण्यश्रेणीं नवसुरसरिद्वातवलितम् ।
नवीन श्रीराधाहरिरसमयोत्कीर्त्तनविधिं
नवद्वीपं वन्दे नवकरुणमाद्यं नवरुचिम् ॥

श्रीमन्महाप्रभु का ध्यान–
श्रीमन्मौक्तिकदामबद्धचिकुरं सुस्मेरचन्द्राननं
श्रीखण्डागुरुचारुचित्रवसनं स्रग्दिव्यभूषाञ्चितम् ।

नृत्यावेशरसानुमोदमधुरं कन्दर्पवेशोज्ज्वलं
चैतन्यं कनकद्युतिं निजजनैः संसेव्यमानं भजे ॥

प्रणाममन्त्र–
आनन्दलीलामयविग्रहाय हेमाभदिव्यच्छविसुन्दराय ।
तस्मै महाप्रेमरसप्रदाय चैतन्यचन्द्राय नमो नमस्ते ॥

प्रार्थना–
संसार दुःख जलधौ पतितस्य काम-
क्रोधादिनक्रमकरैः कवलीकृतस्य ।
दुर्वासना निगड़ितस्य निराश्रयस्य
चैतन्यचन्द्र ! मम देहि पदावलम्बम् ॥

श्री मन्नित्यानन्दप्रभु का ध्यान
विद्युद्दाममदाभिमर्द्दनरुचिं विस्तीर्णवक्षः स्थलं
प्रेमोद्घूर्णित लोचनाञ्चललसत्स्मराभिरम्याननं ।
नानाभूषणभूषितं सुमधुरं बिभ्रद्घनाभाम्बरं
सर्व्वानन्दकरं परं प्रवरनित्यानन्दचन्द्रं भजे ॥

प्रणाम–
नित्यानन्दमहं वन्दे कर्णे लम्बितकुण्डलं ।
चैतन्याग्रजरूपेण पवित्रीकृतभूतलम् ॥

यथावा–औदार्य्येण सुकामधेनु दिविषद्वृक्षेन्दुचिन्तामणि
वृन्दं ब्रह्मसुखञ्च सुन्दरतया कन्दर्पवृन्दं प्रभुम् ।
वात्सल्येन सुमातृधेनुनिचयं विस्पर्द्धिनं नन्दिनं
नित्यानन्दमहं नमामि सततं प्रेमाब्धिसंवर्द्धिनम् ॥

विज्ञापन–हाडायिपण्डित तनूज ! कृपासमुद्र
पद्मावतीतनय तीर्थपदारविन्द ।
त्वं प्रेमकल्पतरुरार्त्तिहरावतारो
मां पाहि पामरमनाथमनन्यबन्धुम् ॥

श्री अद्वैत प्रभु का ध्यान

सद्धकालिनिषेविताङ्घ्रिकमलं कुन्देन्दुशुक्लाम्बरं
शुद्धस्वर्णरुचिं सुबाहुयुगलं स्मेराननं सुन्दरम् ।
श्रीचैतन्यदृशं वराभयकरं प्रेमांगभूषान्वित
मद्वैतं सततं स्मरामि परमानन्दैक कन्दं प्रभुम् ॥

प्रणाम—येन श्रीहरिगीश्वरः प्रकटयाञ्चक्रे कलौ राधया
प्रेम्ना येन महेश्वरेण सकलं प्रेमाम्बुधौ प्लावितं ।
विश्वं विश्वविकासिकीर्त्तिमतुलं तं दीनवन्धुं प्रभु
मद्वैतं सततं नमामि हरिणाद्वैतं हि सर्व्वार्थदम् ॥

विज्ञापन--अद्वैत ते करुणया प्रणयावलोकैः
के वा भवन्नहि शचीतनयस्य दासाः ।
प्रेमाम्बुधौ च सहसा वत के न मग्ना
आशापि नो भवति मे वत किं ब्रवीमि ॥

श्रीगदाधरपण्डितगोस्वामी का ध्यान—

कारुण्यैक मरन्दपद्म चरणं चैतन्यचन्द्रद्युतिं
ताम्बुलार्पणभंगिदक्षिणकरं श्वेताम्बरं सुन्दरम् ।
प्रेमानन्दतनुं सुधास्मितमुखं श्रीगौरचन्द्रेक्षणं
ध्यायेच्छ्रीलगदाधरं द्विजवरं माधुर्य्यभूषोज्वलम् ॥

प्रणाम—गान्धर्व्विकास्वरूपाय गौरांगप्रेमसम्पदे !
गदाधराय मे नित्यं नमोऽस्तु हि कृपालवे ॥

विज्ञापन—

हे श्रीगदाधर दयासरितां पतिस्त्वं
प्रेम्णा वशीकृतशचीतनयो विभुश्च ।
पद्मावती तनय एव तथा वशस्ते
किं ते ब्रवीमि मयि मूढ़वरे कृपायै ॥

श्रीवासपण्डितजी का ध्यान

श्रीगौरांगकृपावासं गौरमूर्त्तिरसप्रदं ।
शुक्लाम्बर धरं पृथ्वीदेवं भक्तजनप्रियम् ॥
सकीर्त्तनरसावेशं सर्व्वसौभाग्यभूषितम् ।
स्मरामि भक्तराजं हि श्रीश्रीवासं हरिप्रियम् ॥

प्रणाम—

श्रीवासपण्डितं नौमि गौरांगप्रियपार्षदम् ।
यस्य कृपालवेनापि गौरांगे जायते रतिः ॥

विज्ञापन—

हे श्रीवासादय ! इह कृपामूर्त्तयो गौरचन्द्र
प्रेमाम्भोधेः सुरविटपिनः शान्तसौम्यस्वभावाः ।
दीनोद्धारे प्रव्रतनियमाः प्रेमदा यूयमेव
तस्मादङ्घ्रिं प्रपदरजसा पापिनं मां पुनीत ॥

गौरांगभक्तों का प्रणतिमन्त्र—

"श्रीगौरांगपरिकरगणेभ्यो नमः" ।

श्रीवैष्णवप्रणाम—

वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः ॥

श्रीगौरांगभक्तगण प्रणाम—

गौरभक्तगणान् वन्दे स्वानन्दरसविग्रहान् ।
नाममुद्रालसद्धस्तानाश्रिताश्रयवत्सलान् ।
नामसंकीर्त्तनाद्यैश्च कम्पाश्रुपुलकान्वितान् ।
चैतन्यचरणाम्भोज मकरन्दमधुव्रतान् ॥

श्री मद्वृन्दावनध्यान ।

श्रीमद्वृन्दावनं रम्यं यमुनायाः प्रदक्षिणम् ।
शुद्ध स्फटिक संस्थानं कल्पवृक्ष सुशोभितम् ॥

नानावर्णकुसुमानां रेणुभिः परिपूरितम् ।
ध्येयं बृन्दावनं नित्यं गोविन्दस्थानमव्ययम् ॥

सयोगपीठ श्री बृन्दावनध्यान–

ततो बृन्दावनं ध्यायेत् परमानन्दवर्द्धनम् ।
सर्व्वर्त्तुकुसुमोपेतं पतत्रिगणनादितम् ॥
भ्रमद् भ्रमरझङ्कारं मुखरीकृतदिङ्मुखम् ।
कालिन्दी जल कल्लोलसंगी मारुत सेवितम् ॥
नानापुष्पलताबद्ध वृक्षषण्डैश्च मण्डितम् ।
कमलोत्पलकल्हार धूलि धूसरितान्तरम् ॥
तन्मध्ये रत्नभूमिञ्च सूर्य्यायुतसमप्रभम् ।
तत्र कल्पतरूद्यानं नियतं रत्नवर्षिणम् ॥
माणिक्य शिखरालम्बि तन्मध्ये मणिमण्डपम् ।
नानारत्नगणैश्चित्रं सर्व्वतः सुविराजितम् ॥
नाना रत्नलसच्चित्रं वितानैरुपशोभितम् ।
रत्नतोरण गोपूरमाणिक्याच्छादनान्वितम् ॥
दिव्यघण्टायुक्तमुक्तामणिश्रेणिविराजितम् ।
कोटि सूर्य्यसमाभासं विमुक्तं षट्तरङ्गकैः ॥
तन्मध्ये रत्नखचितं रत्नसिंहासनं महत् ।
तत्रस्थौ राधिकाकृष्णौ ध्यायेदखिलसिद्धिदौ ॥

श्रीराधिकानाथजी का ध्यान

ओं फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंस प्रियं
श्रीवत्सांकमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्च्चिततनुं गो गोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥

प्रणाम–नमो नलिननेत्राय वेणुवाद्यविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥
पुनः ध्यान–सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरम् ॥
गोपगोपी गवावीतं सुरद्रुमलताश्रयम् ।
दिव्यालंकरणोपेतं रक्तपंकजमध्यगम् ॥
कालिन्दीजलकल्लोलसंगिमारुतसेवितम् ।
चिन्तयंश्चेति तं कृष्णं मुक्तो भवति संसृतेः ॥
प्रणाम–नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
विज्ञप्तिः–प्रणिपत्य भवन्तमर्थये पशुपालेन्द्रकुमार ! काकुभिः ।
व्रजयौवतमौलिमालिकाकरुणापात्रमिमं जनं कुरु ।

श्रीराधिकाजी का ध्यान

ध्यान–अमलकमलकान्तिं नीलवस्त्रां सुकेशीं
शशधरसमवक्त्रां खञ्जनाक्षीं मनोज्ञां ।
स्तनयुगगत मुक्तादामदीप्तां किशोरीं
व्रजपति सुतकान्तां राधिकामाश्रयेऽहम् ॥
प्रणाम–नवीनां हेमगौरांगीं पूर्णानन्दवतीं सतीम् ।
वृषभानुसुतां देवीं वन्दे राधां जगत् प्रसूं ॥
राधां रासेश्वरीं रम्यां स्वर्णकुण्डलभूषिताम् ।
वृषभानुसुतां देवीं तां नमामि हरिप्रियाम् ॥
महाभावस्वरूपा त्वं कृष्णप्रियावरीयसी ।
प्रेमभक्तिप्रदे देवि राधिके त्वां नमाम्यहम् ॥
रासोत्सवविलासिन्यै नमस्ते परमेश्वरि !
कृष्णप्राणाधिके राधे परमानन्दविग्रहे ! ॥

विज्ञापन-तवैवास्मि तवैवास्मि न जीवामि त्वया विना
इति विज्ञाय देवि ! त्वं नय मां चरणान्तिकम् ॥
राधे बृन्दावनाधिशे करुणामृतवाहिनि !
कृपया निजपादाब्जे दास्यं मह्यं प्रदीयताम् ॥

अथ

अष्टसखी तथा मञ्जरीगण, स्थान, रूप, सेवादि

प्रधानाष्टदलेष्वेवमष्टौ श्रीललितादयः ।
राधाकृष्णसुखामोदाः सेवोपायनपाणयः ।
सवृन्दा यत्नतो ध्येयास्तत्रादौ ललितोत्तरे ।
ऐशान्ये तु विशाखैन्द्रे चित्रेन्दुलेखिकाग्नेये ॥
याम्ये चम्पकवल्ली च नैर्ऋत्ये रङ्गदेविका ।
पश्चिमे तुङ्गविद्याथ सुदेवी वायवे तथा ॥

श्रीमञ्जरीगण स्मरण

अथाष्टोपदलेष्वेवमनङ्गमञ्जरी मुखाः ।
सयूथा यत्नतो ध्येयास्तत्रोत्तरदलद्वये ॥
अनङ्गमञ्जरी तस्या वामे मधुमती मता ।
पूर्व्वयो विमला वामे श्यामला दक्षिणे द्वयोः ।
पालिका मङ्गले वारुणयोर्धन्या च तारका ॥ १ ॥
अथ किञ्जल्कपार्श्वस्थाः सर्व्वदा सेवनोत्सुकाः ।
प्रियनर्मसखीर्ध्यायेत् कृष्णदक्षिणतः क्रमात् ।
लवंगमञ्जरीं रूपमञ्जरीं रसमञ्जरीं ।
गुणवत्युत्तरे नाम मञ्जर्य्यौ रसमञ्जरीं ।
लीलामञ्जरीकाञ्चैव विलासमञ्जरीं तथा ।
विलासमञ्जरीश्चान्यां मञ्जर्य्यौ केलिकुन्दयोः ॥
मदनाशोकमञ्जर्य्यौ मञ्जुलालीं सुधामुखीं ॥

पद्ममञ्जरिकामेताः षोडशप्रवरा मता ।
एतासां संगिनीभूत्वा श्री गुर्व्वाज्ञानुसारतः ।
राधामाधवयोः सेवां कुर्य्यान्नित्यं प्रयत्नतः ॥
ताम्बुले ललितादेवी कर्पूरादौ विशाखिका ।
चामरे चम्पकलता चित्रा वसनसेवने ॥
रागे तु तुङ्गदेवी सा सुदेवी जलसेवने ।
नानावाद्ये तुङ्गविद्या चेन्दुलेखा च नर्त्तने ॥
दर्पणे शशिरेखा च विमला पादसेवने ।
पाली कुसुमशय्यायां वेशे चानङ्गमञ्जरी ॥
श्यामला चन्दनादौ च गाने मधुमती तथा ॥
धन्या रत्नविभूषायां मङ्गला माल्यसेवने ।
इत्याद्याः कोटिशो गोप्यो नानासेवां प्रकुर्व्वते ॥

गोरोचनारुचिमनोहरकान्तिदेहां
मयूरपुच्छतुलितच्छविचारुचेलाम् ।
राधे तव प्रियसखीञ्च गुरुं सखीनां
ताम्बूलभर्मकललितां ललितां नमामि ॥

सौदामिनी निचय चारुरुचि प्रतीकां
ताराबली ललितकान्तिमनोज्ञचेलाम् ।
श्रीराधिके तव चरित्रगुणानुरूपां
सद्गन्धचन्दनरतां नमामि विशाखाम् ॥

काश्मीर कान्ति कमनीयकलेवराभां
सुस्निग्धकाचनिचयप्रभचारुचेलाम् ।
श्रीराधिके तव मनोरथ वस्त्रदाने
चित्रां विचित्रहृदयां सदयां प्रपद्ये ॥

नित्योत्सवां हि हरितालसमुज्वलाभां
सद्दाड़िमीकुसुमकान्तिमनोज्ञचेलाम् ।

वन्दे मुदा रुचिविनिर्जितचन्द्रलेखां
श्रीराधिके तव सखीमहमिन्दुरेखाम् ॥
सद्रत्नचामरकरां वरचम्पकाभां
चासाख्यपत्ररुचिर च्छविचारुचेलाम् ।
सर्वान् गुणान् तुलयितुं दधतीं विशाखां
राधेऽथ चम्पकलतां भवतीं प्रपद्ये ॥
सत्पद्म केशर मनोहर कान्तिदेहां
प्रोद्यज्जपाकुसुमदीधिति चारुचेलाम् ।
प्रायेण चम्पकलताधिगुणां सुशीलां
राधे भजे प्रियसखीं तव रङ्गदेवीम् ॥
सच्चन्द्र चन्दनमनोरम कुंकुमाभ्यां
पाण्डुच्छवि प्रचुरकान्ति लसद् कूलाम् ।
सर्वत्र कोविदतया महितां समज्ञां
राधे भजे प्रियसखीं तव तुङ्गविद्याम् ॥
प्रोत्तप्त शुद्धकनकच्छविचारुदेहां
प्रोद्यत् प्रवालनिचयप्रभचारुचेलाम् ।
सर्वानुजीवन गुणोज्वलभक्तिदक्षां
श्रीराधिके तव सखीं कलये सुदेवीम् ॥
वसन्तकालोद्भवकेतकीतति प्रभाविडम्बयुद्रुद्दकान्तिडम्बरां
विनिन्दितेन्दीवरभास्वराम्बरामनङ्गपूर्णम्यु प्रणमामि मञ्जरी
चपलाद्युतिनिन्दिकान्तिकां शुभतारावलिशोभिताम्बराम् ।
व्रजराजसुतप्रमोदिनीं प्रभजे ताञ्च लवंगमञ्जरीम् ॥
गोरोचनानिन्दिनिजांगकान्तिं मायूरपिच्छाभसुचीनवस्त्राम् ।
श्रीराधिकापादसरोजदासीं रूपाख्यकां मञ्जरिकां भजेऽहम्
हंसपत्ररुचिरेण वाससा संयुतां विकचचम्पकद्युतिम् ।
चारुरूप गुण सम्पदान्वितां सर्वदापि रसमञ्जरीं भजे ॥

जवानिभदुकूलाढ्यां तडिदालितनुच्छविम् ।
कृष्णामोदकृतपेक्षां भजेऽहं गुणमञ्जरीम् ॥
बन्धूकवर्णं वसनं वसानां तड़ित्प्रभादग्धतनुच्छविञ्च ।
श्रीराधिकाया निकटे वसन्तीं भजे सुरूपां रतिमञ्जरीं ताम्
विशुद्धचामीकरसुन्दराभां तारावलीचारुमनोज्ञचेलाम् ।
श्रीराधिकाया निकटे वसन्तीं भद्राख्यकां मञ्जरिकां भजेऽहम्
विशुद्धहेमाब्जकलेवराभां सुवस्त्ररत्नादिविभूषितांगीम् ।
श्रीराधिकाया निकटे वसन्तीं लीलाख्यकां मञ्जरिकां भजेऽहं
स्वर्णकेतकीविनिन्दिकायकां निन्दितभ्रमरकान्तिकाम्बराम् ।
कृष्ण पादकमलोपसेविनीमर्च्चयामि सुविलासमञ्जरीम् ॥
प्रतप्त हेमांगरुचि मनोज्ञां शोणाम्बरां चारु सुभूषणाढ्याम् ।
श्रीराधिकापादसरोजदासीमन्यां तव मञ्जरिकां भजामि ॥

सखीमञ्जरीगण का प्रणाम वन्दनादि

कारुण्यकल्पलतिके ललिते नमस्ते
राधासमानगुणचातुरिके विशाखे !।
त्वां नौमि चम्पकलतेऽच्युतचित्तचौरे !
वन्दे विचित्रचरित्रे सखि चित्रलेखे ! ॥
श्री रङ्गदेवि दयिते ! प्रणयाङ्गरंगे
तुभ्यं नमोऽस्तु सुखदे दयिते सुदेवि !
विद्याविनोदसदनेऽपि च तुङ्गविद्ये
पूर्णेन्दुखण्डनखरे सुमुखीन्दुलेखे ! ॥
राधानुजे मम नमोऽस्तु अनङ्गदेवि !
तुभ्यं नमो मधुमति प्रियतामरन्दे !
सौहार्द सौख्यविमले विमले नमस्ते
श्रीश्यामले परमसौहृदपात्रराधे ॥

हे पालिके प्रणयपालिनि मे नमस्ते
श्री मङ्गले परम मङ्गलसीमरूपे !
धन्ये व्रजेन्द्रतनयप्रियता सु सम्पन्
नौमीशचन्द्ररुचिरे ननु तारके त्वाम् ॥
ताम्बुलार्पणपाद मर्द्दन पयोदानाभिसारादिभिः
वृन्दारण्यमहेश्वरीं प्रियतया यास्तोषयन्ति प्रियाः ।
प्राणप्रेष्ठसखीकुलादपि किलासंकोचिताभूमिकाः
केलीभूमिषु रूपमञ्जरीमुखास्ता दासिकाः संश्रये ॥

सेवकगण–

मणिमयवरमण्डनोज्वलांगान्
पुरट जवामधुलिट्पटीरभासः ।
निजवपुरनुरूपदिव्यवस्त्रान्
व्रजपतिनन्दनकिंकरान्नमामि ॥

वयस्यगण–

वलानुज सदृग्वयो गुणविलासवेषश्रियः
प्रियंकरणवल्लकीदल विषाणवेण्वंकिताः ।
महेन्द्रमणिहाटक स्फटिकपद्मरागत्विषः
सदा प्रणयशालिनः सहचरा हरेः पान्तु नः ॥

श्रीवलदेवस्य–

गण्डान्तः स्फुरदेककुण्डलमलिच्छन्नावतंसोत्पलं
कस्तूरीकृतचित्रकं पृथु हृदि भ्राजिष्णुगुञ्जास्रजम् ।
तं वीरं शरदम्बुदद्युतिभरं संवीत कालाम्बरं
गम्भीरस्वनितं प्रलम्बभुजमालम्वे प्रलम्बद्विषम् ॥

यशोदायाः–

क्षौमं वासः पृथुकटितटे बिभ्रति सूत्रनद्धं
पुत्रस्नेह स्नुतकुचयुगं जातकम्पश्च सुभ्रूः ।

रज्वाकर्षश्रमभुजचलत्कंकणौ कुण्डले च
स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममन्थ ॥

श्रीव्रजाधीशस्य–

तिलतण्डुलितैः कचैः स्फुरन्तं
नवभाण्डीरपलाशश्वरुचेलम् ।
अति तुन्दिलमिन्दुकान्तिभाजं
व्रजराजं वरकूर्चमर्चयामि ॥

श्रीरोहिणीदेव्याः–

पुत्रादुच्चैरपि हलधरात् सिञ्चति स्नेहपूरै
र्गोविन्दं याद्भुतरसवतीप्रक्रियासु प्रवीणा ।
सख्य श्रीभिर्व्रजपुरमहाराजराज्ञीं नयैस्तद्
गोपेन्द्रं या सुखयति भजे रोहिणीमीश्वरीं ताम् ॥

श्रीवृषभानोः–

खर्वश्मश्रुमुदारमुज्वलकुलं गौरं समानं स्फुरत्
पञ्चाशत्तमवर्ष वन्दितवयः कान्तिं प्रवीणं व्रजे ।
गोष्ठेशस्य सखायमुन्नततर श्रीदामतोऽपि प्रिय
श्रीराधं वृषभानुमुद्भटयशोव्रातं सदा तं भजे ॥

श्रीकीर्त्तिदायाः ।–

अनुदिनमिह मात्रा राधिकाभव्यवार्त्ताः
कलयितुमतियत्नात् प्रेष्यते धात्रिकायाः ।
दुहितृयुगलमुच्चैः प्रेमपूरप्रपञ्चै
र्विकलमति यथाऽसौ कीर्त्तिदा साऽवतान्नः ॥

श्रीपौर्णमास्याः ।–

श्रीपौर्णमास्याश्चरणारविन्दं
वन्दे सदा भक्तिवितानहेतुम् ।

श्री कृष्णलीलाब्धितरङ्गमग्नं
यस्या मनः सर्वनिषेवितायाः ॥

श्रीवृन्दावनस्य-
आनन्दवृन्द परितुन्दिलमिन्दिराया
आनन्दवृन्द परिनन्दितनन्दपुत्रम् ।
गोविन्द सुन्दरवधू परिनन्दित तद्
वृन्दावनं मधुरमूर्त्तमहं नमामि ॥

श्रीयमुनायाः-
चिदानन्दभानोः सदानन्दसूनोः
परप्रेमपात्री द्रवब्रह्मगात्री ।
अघानां लवित्री जगत्क्षेमधात्री
पवित्री क्रियान्नो वपु मित्रपुत्री ॥

श्रीगोवर्द्धनस्य-
गोवर्द्धनो जयति शैलकुलाधिराजो
यो गोपिकाभिरुदितो हरिदासवर्य्यः ।
कृष्णेन शक्रमखभङ्गकृतार्च्चितो यः
सप्ताहमस्य करपद्मतलेऽप्यवात्सीत् ॥

श्रीवृन्दायाः ।-
तवारण्ये देवि ! ध्रुवमिह मुरारि विहरते
सदा प्रेयस्येति श्रुतिरपि गिरौति स्मृतिरपि ।
इति ज्ञात्वा वृन्दे चरणमभिवन्दे तव कृपां
कुरुष्व क्षिप्रं मे फलतु नितरां तर्षविटपी ॥

❀ कीर्त्तन प्रकरण ❀

※ अथ नित्यकीर्त्तन के पद ※

भैरव

मंगल आरति गौर किशोर । मंगल नित्यानन्द जोरहिं जोर ॥
मंगल श्री अद्वैत भकतहिं संगे । मंगल गाओत प्रेम तरंगे ॥
मंगल बाजत खोल करताल । मंगल हरिदास नाचत भाल ॥
मंगल धूप दीप लइया स्वरूप । मंगल आरति करे अपरूप ॥
मगल गदाधर हेरि पहुँ हास । मंगल गाओत दीन कृष्णदास ॥

भैरव

मंगल आरति युगल किशोर । जय जय करतहिं सखीगण भोर ॥
रतन प्रदीप करे टलमल थोर । निरखत मुख विधु श्याम सुगोर ॥
ललिता विशाखा सखी प्रेमे आगोर । करत निरमंछन दोंहे दुहुं भोर ॥
वृन्दावन कुञ्जहिं भुवन उजोर । मूरति मनोहर युगल किशोर ॥
गाओत शुक पिक नाचत मयूर । चाँद उपेखि मुख निरखे चकोर ॥
बाजत विविध यन्त्र घन घोर । श्यामानन्द आनन्दे बाजाय जयतोर ॥

भैरवी

सोङ्र नव गौरचन्द्र नागर बनयारी ।
नदीया इन्दु करुणासिन्धु भकत बत्सलकारी ॥
वदन चन्द्र अधर सुरंग नयने गलत प्रेम तरंग
चन्द्र कोटि, भानु कोटि, मुख शोभा निछयारी ।
कुसुम शोभित चाँचर चिकुर ललाटे तिलक नासिका उजोर
दशने मोतिम, अमिया हास, दामिनी बनयारी ॥
मकर कुण्डल झलके गण्ड मणि कौस्तुभ दीप्त कण्ठ
अरुण वसन करुण वचन, शोभा अति भारी ॥
माल्य चन्दन चर्च्चित अंग लाजे लज्जित कोटि अनंग
चन्दन वलया, रतन नुपुर, यज्ञसूत्रधारी ॥

छत्र धरत धरणी धरेन्द्र गाओत यश भकत वृन्द
कमला सेवित, पादपद्म, बलि जाऊँ बलिहारि
कहत दीन कृष्णदास गौर चरण करत आश
पतित पावन निताइ चाँद प्रेमदान कारी।

भैरवी

जय राधे श्री राधे जय जय राधे गोविन्द राधे ।
ठाकुर हामारि, नन्दकि लाला ठाकुराणी श्रीमति राधे ॥
एक पालङ में दुहुं जन बैठे, दुहुं मुख सुन्दर साजे।
रातुल चरणे, मणिमय नूपुर, रुणझुनु रुणझुनु बाजे॥
श्याम गले वन माला विराजे, राइ गले मोती साजे।
श्याम शिरे, मयूरपुच्छ, राइ शिरे सीथि साजे॥
श्याम परेछे पीतबास, राइ नीलाम्बरी साजे।
भुवन मोहन सने, भुवन मोहिनी, एकसने विराजे॥
श्री वृन्दाबन में कुसुम कानने,भ्रमरा हरि गुण गाओये।
श्रीवृन्दावन में निकट यमुना, मुरली तान सुनाओये॥
सुचारु वयाने, वंकिम नयाने हेर हेर, चांहनि साजे।
चांचर-चिकुर, मयूरक कण्ठित, कुञ्चित केश विराजे॥
शारी शुक गान करे, तमालेरइ डाले ।
तपन तनया, मोहन मुरली, शुनि उजान वहि चले॥
मयूर मयूरी नाचे, कोकिलेर ध्वनि ।
दास मनोहर, करत निवेदन, दया कर श्रीराधे॥

मध्याह्नकीर्त्तन

जय जय नित्यानन्दाद्वैत गौरांग ।
निताइ गौरांग निताइ गौरांग, जय जय नित्य०
जय जय यशोदा नन्दन शचीसुत गौरचन्द्र ।
जय जय रोहिणी नन्दन बलराम नित्यानन्द ।

जय जय महाविष्णुर अवतार श्री अद्वैत चन्द्र ।
जय जय गदाधर श्रीवासादि गौर भक्त वृन्द ।
जय जय स्वरूप रूप सनातन राय रामानन्द ।
जय जय खण्डवासी नरहरि मुरारि मुकुन्द ।
जय जय पञ्चपुत्र संगे जय जय राय भवानन्द।
जय काशीमिश्र सार्वभौम जय प्रतापरुद्र ।

जय कानाइखुटिया शिखिमाहिती गोपीनाथाचार्य्य।
जय तिन पुत्र संगे जय जय सेन सिवानन्द ।
जय काशीवासी तपनमिश्र जय प्रकाशानन्द ।
जय छोट वड हरिदास दास गोविन्द ।
जय द्वादश गोपाल आदि चौषठि महांत।
जय गिरि-पुरी-भारती आदि पुरी माधवेन्द्र।
जय छय चक्रवर्त्ती अष्ट कविराज चन्द्र।
जय वासुदेव घोष आदि वसु रामानन्द।
जय वसुधा जान्हवा प्राण गंगा वीरचन्द्र।
जय श्री अद्वैत सीतात्मज श्री अच्युतानन्द।
जय कालिदास झडु ठाकुर जय उद्धारण दत्त।
जय पुण्डरीक विद्यानिधि वक्रेश्वर पंडित।
जय राघव पण्डित गदाधरदास भागवताचार्य्य।
जय अभिराम गौरीदास नन्दन आचार्य्य।
जय परमेश्वरदास पुरी गोसाञि जय जगदानंद।
जय जगाइ माधाइ चापाल गोपाल जय देवानंद।
जय भूगर्भ श्रीलोकनाथ जय श्यामानन्द ।
जय श्रीनिवास नरोत्तम प्राण रामचन्द्र।
जय उड़िया गौड़ीया आदि गौर भक्तवृन्द।
(तोमरा) सबे मिलि दया कर आमि अति मन्द ।

कपट कुटिनाटि घुचाये भजाओ श्रीकृष्णचैतन्य ।
निशि दिशि हियाय जागाओ श्रीगुरु गौरांग ।
श्री संकीर्तन रंगे देखाओ श्रीनिताइ गौरांग ।
(येन)व्याकुल प्राणे गाइते पारि हा निताइ गौरांग ।
(गाइ) येन हा निताइ गौरांग ॥
जय जय राधे कृष्ण गोविन्द । राधे गोविन्द राधे गोविन्द ।
जय जय श्याम सुन्दर मदनमोहन वृन्दावनचन्द्र ।
जय जय राधारमण रासविहारी श्रीगोकुलानन्द ।
जय जय राधाकांत राधाविनोद श्रीराधागोविंद ।
जय जय रासेश्वरी विनोदिनी भानुकुल चन्द्र ।
जय जय ललिता विशाखा आदि यत सखी वृन्द ।
जय जय श्रीरूपमञ्जरी आदि मञ्जरी अनंग ।
जय जय पौर्णमासी कुन्दलता आर वीरावृन्द ।
कृपा करि देह युगल चरणारविन्द ॥
जय नन्दनन्दन गोपीजन वल्लभ, राधानायक नागर श्याम।
सो शचीनन्दन नदीया पुरन्दर, सुरमुनिगण मन मोहन धाम ।
जय निजकान्ता कान्ति कलेवर, जय निज प्रेयसी भाव विनोद।
जय व्रजसहचरी लोचन मंगल, जय नदीया वधु नयन आमोद ॥
जय जय श्रीदाम, सुदाम सुबलार्जुन, प्रेम प्रवर्द्धन नवघन रूप।
जय रामादि सुन्दर प्रिय सहचर, जय जय मोहन गौर अनूप ॥
जय अतिवल, बलराम प्रियानुज, जय जय नित्यानन्द आनन्द ।
जय जय सज्जन गण भय भञ्जन, गोविन्ददास आश अनुवन्ध ॥

श्रीगौरांग देवजू की सन्ध्याआरती ।

भालि गोरा चाँदेर आरती वनि ।
बाजे संकीर्तने सुमधुर ध्वनि ॥
शंख बाजे घण्टा बाजे बाजे करताल ।

मधुर मृदंग बाजे शुनिते रसाल ॥
विविध कुसुम फुले बनि वन माला।
कत कोटि चन्द्र जिनि वदन उजला ॥
ब्रह्मा आदि देव जाँको कर जोड़ करे ।
सहस्र वदने फणी शिरे छत्र धरे ॥
शिव शुक नारद व्यास विचारे ।
नाहि परात्पर भाव विभोरे ॥
श्रीनिवास हरिदास मंगल गाओये ।
नरहरि गदाधर चामर दुलाओये ॥
वीरवल्लभदास श्री गौर चरणे आश ।
जग भरि रहल महिमा प्रकाश ॥

श्रीराधाराणी की आरती ।

जय जय राधेजी को शरण तोहारि ।
ऐछन आरति याउ बलिहारि ॥
पाट पटाम्बर ओढे नील-शाडी ।
सींथक सिन्दूर याउ बलिहारि ॥
वेश बनायल प्रिय सहचरी ॥
रतन सिंहासने वैठल गौरी ॥
रतने जडित मणि माणिक मोती ।
झलमल आभरण प्रति अंग ज्योति ॥
चौदिके सखीगण देइ करताली ।
आरती करतहिं ललिता पियारी ॥
नव नव व्रजबधू मंगल गाओये ।
प्रिय नर्म्म सखीगण चामर दुलाओये ॥
राधा पद पंकज भकतहिं आसा ।
दास मनोहर करत भरोसा ॥

श्रीमदन गोपाल देव की आरती।

हरत सकल सन्ताप जनम को
मिटत तलप यम कालकि ।
आरति किये जय श्री मदन गोपाल की ॥
गो घृत-रचित: कर्पूरक वाति
झलकत काञ्चन थालकि ।
चन्द्रकोटि कोटि भानु कोटि छवि,
मुख शोभा नन्दलाल कि ॥
चरण कमल पर नूपुर राजे,
उरे दोले वैजयन्तीमाल कि ।
मयूर मुकुट पीताम्बर सोहे,
बाजत वेणु रसाल कि ॥
सुन्दर लोल कपोलन किये छवि,
निरखत मदनगोपाल कि ।
सुर-नर मुनिगण करतहिं आरति,
भगतवत्सल प्रतिपाल कि ॥
बाजे घण्टा ताल मृदङ्ग झांझरि,
अञ्जलि कुसुम गुलाल कि ।
हुं हुं वलि वलि रघुनाथदास गोस्वामि
मोहन गोकुल लालकि ॥
आरति किये जय श्रीमदन गोपालकि ।
मदन गोपाल जय जय यशोदा दुलालकि ॥
यशोदा दुलाल जय जय नन्द दुलालकि ।
नन्द दुलाल जय जय गिरिधारी लालकि ॥
गिरिधारी लाल जय जय राधारमण लालकि ।
राधारमण लाल जय जय राधाविनोद लालकि ।

राधाविनोद लाल जय जय राधाकान्त लालकि ।
राधाकान्त लाल जय जय गोविन्द गोपालकि ।
